अद्वयु त्रि० द्वय द्विप्रकारोऽस्त्यस्य वा० उ न०त०। द्वि-प्रकाररूपकापट्यशून्ये अनर्वाचैकरूपे "उप द्वयुष्वाद्वयुश्च वसव इति" ऋ०८, १८, १५।

अद्वार न० निन्दित द्वारम्। प्रवेशानर्हे क्षुद्रद्वारे "अद्वारेण प्रवेशनमिति" "अद्वारेण न चातीयाद्ग्रामं वा वेश्म वा पुरमिति" च पुरा०। नास्ति द्वारमस्य ब०। प्रवेशायोग्ये दुष्प्रवेशे, अगम्ये अनुपाये च त्रि०।

अद्वितीय त्रि० द्विधा इतं भेदं गतम् द्वीतम् तस्य भाव द्वैत तन्नास्ति यस्य ब०। सजातीयादिभेदशून्ये केवले परमा-त्मनि। वस्त्वद्वितीयमिति भा० "एकमेवाद्वितीय ब्रह्मेति" श्रुति। "अत्र एकम्, एव, अद्वितीयमिति" पदत्रयेण ब्रह्मणि भेदत्रयराहित्यमुक्तम्। तथाहि भेदस्तावत् त्रिधा स्वगतभेद सजातीयभेद विजातीयभेदश्चेति। वृक्षादीनां स्वावयवशाखादिभ्यो भेद स्वगतभेद, घटात् घटान्तरस्य भेद सजातीयभेद, घटस्य पटादितो भेद विजातीयभेद। ब्रह्मणश्च "तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रेण स्वकार्यात् घटादितोऽनन्यत्वात् न स्वगतभेद। घटादेर्व्याव-हारिकसत्त्वस्वत्वेन पारमार्थिकसत्त्ववतो ब्रह्मण विजातीय-त्वेऽपि ततोऽभेदएव तद्भिन्नस्याभावात् "सर्वं खल्विद ब्रह्मेति" श्रुत्यन्तरात् तत्सजातीयवस्त्वन्तराभावादेव तद्भेद सिद्धएवेत्यादिकमाकरे दृश्यम्। द्वितीयशून्ये, असहचरे त्रि०।

अद्विषेण्य त्रि० द्वेष्टु शीलमस्य, द्विष–एण्यन्–किच्च न०त०। प्रियरूपे, "मयोभुरद्विषेण्य सखेति" ऋ० १,१८७,३, अद्वेषिण्य अद्वेष्यस्य प्रियस्य इति भाष्यम्।

अद्वेष पु० न द्वेष अभावार्थे न०त०। द्वेषाभावे। ब०। द्वेषरहिते त्रि०। "अद्वेषो हस्तयोर्दधे" इति ऋ० १ २४,४, "अद्वेष द्वेषरहित नास्ति द्वेषोऽस्येति" भाष्यम्। एतेन अद्वेष शब्दे एतन्मन्त्रस्योदाहरणत्वेनोपन्यास केषाञ्चित् भाष्यादर्शनमूलकः।

अद्वेषस् त्रि० द्विष–असुन् न०त०। द्वेषानाश्रये द्वेषाकर्त्तरि "अद्वेषो मरुतो गातुमेतनेति" ऋ० ५,८७,८, "अद्वेष अद्वेषस" इति भाष्यम्।

अद्वैत न० द्विधा इतम् द्वीत तस्य भाव द्वैतं भेद अभावार्थे न०त०। अभेदे, "अद्वैत सुखदुःखयोरनुगुण सर्वास्वव-स्थासु यदिति" उत्तरचरितम्। नास्ति द्वैत भेदो यत्र। भेदरहिते त्रि० ब्रह्मणि न०। "अद्वैततत्त्व इव सत्य-तरेऽपि लोक" इति नैषधम्।

अद्वैतसिद्धि पु० अद्वैतस्य जगतो ब्रह्माभेदस्य सिद्धिरत्र। स्वनामख्याते वेदान्तप्रकरणभेदे ६त०। तत्सिद्धौ स्त्री।

अध अव्य० अथ वेदे "सुपां सुलुगित्यादिना" वर्णव्यत्यय। अथ-शब्दार्थे "अधा नियक्ष उत्तर" इति ऋ०४,१८,६ अधा "अथानन्तरमिति" भा०। अधायोपस्य पोपेणेति य० १२,८, अधेति अव्ययम् अथार्थे "निपातस्य चेति पा० दीप इति वेददीप।

अधःक्षाय पु० अधर अधर्म [illegible] । [illegible] [illegible] "[illegible]" [illegible] । "[illegible]" [illegible] ।

अधःकार पु० [illegible] । [illegible] [illegible], [illegible] च ।

अध चित्र त्रि० [illegible] [illegible] । [illegible] [illegible] च ।

अध पश्ची स्त्री० [illegible] (गवल्लूच) [illegible] (काटर) इति [illegible] ।

अधः(अधस्)शय्या स्त्री० [illegible] । [illegible] "[illegible]" [illegible] । [illegible] ।

अधम त्रि० [illegible] । [illegible] च । "[illegible]" [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] ।

अधम त्रि० [illegible] । [illegible] च । "[illegible]" इति । "[illegible]" [illegible] । [illegible] ।

अधमधातक पु० [illegible] । "[illegible]" [illegible] । [illegible] इति [illegible] ।

अधमर्ण त्रि० [illegible] (खातक) इति [illegible] ।

अधमर्णिक त्रि० [illegible] । "[illegible]" इति [illegible] "[illegible]" [illegible] । [illegible] इति । [illegible] ।

अधमाङ्ग न० [illegible] । [illegible] ।

अधमार्ध न० [illegible] । [illegible] च त्रि० ।

अधर पु० न [illegible] च । (ठोट) इति [illegible] । "[illegible]"

[illegible] । "[illegible]" इति वा [illegible] । "[illegible]" इति [illegible] । "[illegible]" [illegible] । [illegible] । [illegible] [illegible] (वा च) । [illegible] । [illegible] "[illegible]" [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] "[illegible]" इति [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] इति [illegible] । [illegible] । [illegible] "[illegible]" इति [illegible] । [illegible]

स्त्री० दक्षिणदिशश्च भूगोले यथाधरत्वं तथा उदक्शब्दे वक्ष्यते । सर्वनाम्ना वृत्तौ पुंवद्भावात् अधरस्या भव० अधरतन इत्यादि अधरस्यां वर्त्तते अधरस्मिन् अधरा अधरस्या अधरस्यामित्यर्थे अधरत इत्यादि । [अधोभागे इत्यर्थे ।

अधरतस् अव्य० अधर—तसिल् । प्रथमापञ्चमीसप्तम्यर्थवृत्तौ

अधरस्तात् अव्य० अधर+अस्ताति पृ० । अधरत इत्यर्थे । "पुरस्तात् सवितोत्तरस्तादधरस्तादिति" ऋ० १०,३६,१४,

अधरमधु न० अधरस्य मध्विव आस्वादातिशयात् । अधररसे । [रतइत्यर्थे

अधरस्तात् अव्य० अधर+सप्तम्याद्यर्थे अस्ताति । अध-

अधराच् त्रि० अधरां दक्षिणां दिशमञ्चति क्विप् । दक्षिण दिग्गन्तरि । "प्राङ् वा उदङ् वाऽधराङ् वा प्रध्यायीताभिमङ्गल इति छा० उ० । स्त्रियामधराचीति । सा च दक्षिणस्यां दिशि च ।

अधराचीन त्रि० अधराचि भव अधराच्+ख । अधःप्रदेशभवे । "अधराचीनमकृणोदपामप" इति ऋ० २,१७,५,

अधराच्य त्रि० अधरस्यां भव यत् । दक्षिणदिग्भवे अधोदिग्भवे च । "अरसं प्राच्यं विषमरसं यदुदीच्यम् अथेदमधराच्यमिति" वेद ।

अधरात् अव्य० अधर+अस्त्यर्थे आति । अधरतइत्यस्यार्थे । "पश्चादोत्तरादधरादापुरस्तादिति" ऋ० ६,८,८, अधरात् दक्षिणत इत्यर्थे ।

अधरीण त्रि० अधरे भव अधर+ख । अधरभवे ।

अधरेण अव्य० अधरस्मिन् देशे, दिशि वा अधर+एनप् । प्रथमासप्तमीवृत्ती आसन्ने नीचे देशादौ, सन्निकृष्टदक्षिणदिशि च । [त्समुपचारात् । अधरदिवसे ।

अधरेद्युस् अव्य० अधरे दिने अधर+एद्युस् । कालवृत्ति-

अधरोत्तर न० अधरश्च उत्तरश्च समा० द्व० । न्यूनाधिकभावेन निम्नोन्नते । "अद्यात् काकः पुरोडाशं श्वा लिह्याद्धविस्तथा स्वाम्यं च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरमिति" मनु ।

अधर्म्म पु० ध्रियतेऽनेन धृ—मनिन् विरोधे न० त० । धर्म्मविरोधिनि वेदादिनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिंसादौ च । "चोदनालक्षणोऽर्थो धर्म्म" इति सूत्रकारेण निषेधलक्षणोऽनर्थोऽधर्म्म इति तल्लक्षणं सूचितम् तत्र वेदप्रतिपाद्योऽर्थो धर्म्मः, तन्निषेधप्रतिपाद्योऽनर्थ अधर्म्मः । स च निषिद्धकर्म्माधीन पापनामा अदृष्टभेदः । अनर्थश्च अनिष्टसाधनम् । तदुपपत्तियुक्तिस्तु "विहितस्याननुष्ठाना-न्निन्दितस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणाम् नरः पतनमृच्छतीति" । "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इत्यादिना शास्त्रेण कर्म्मणामाशुविनाशिनां कालान्तरभाविनरकादिजन्मविशेषान् प्रति हेतुत्वोक्तावपि तथात्वं मध्यस्थद्वारीभूतमदृष्टं विना न सम्भवतीति तत् कल्प्यते अत 'चिरध्वस्त फलायालमित्यादिना" अदृष्टशब्दे दर्शितयुक्तेश्च पापमनर्थसाधनम् । "अधर्म्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नान् जयति समूलस्तु विनश्यतीति" मनु । "अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहमिति" गीता । अधर्म्मभेदात् गतिविशेषोक्तावधर्म्मसत्त्वम् यथा

"कर्म्मभिर्नियतैर्बद्धो जन्तुर्दुःखान्युपाश्नुते । येन येन तु भावेन कर्म्मणा पुरुषो गतिम् । प्रयाति परुषां घोरां तत्ते वक्ष्यामि भारत परम् । अधीत्य चतुरो वेदान् द्विजो मोहसमन्वितः । पतितात् प्रतिगृह्याथ खरयोनौ प्रजायते । खरो जीवति वर्षाणि दश पञ्च च भारत ! । खरो मृतो बलीवर्द्दः सप्त वर्षाणि जीवति । बलीवर्द्दो मृतश्चापि जायते ब्रह्मराक्षसः । ब्रह्मरक्षश्च मासांस्त्रींस्ततो जायेत ब्राह्मणः । पतितं याजयित्वा तु कृमियोनौ प्रजायते । तत्र जीवति वर्षाणि दश पञ्च च भारत ! । कृमिभावाद्विमुक्तस्तु ततो जायेत गर्द्दभः । गर्द्दभः पञ्च वर्षाणि पञ्च वर्षाणि शूकरः । कुक्कुटः पञ्च वर्षाणि पञ्च वर्षाणि जम्बुकः । श्वा वर्षमेकं भवति ततो जायेत मानवः । उपाध्यायस्य यः पापं शिष्यः कुर्य्यादबुद्धिमान् । स जीव इह संसारांस्त्रीनाप्नोति न संशयः । प्राक् श्वा भवति राजेन्द्र ! ततः क्रव्यात्ततः खरः । ततः प्रेतः परिक्लिष्टः पश्चाज्जायेत ब्राह्मणः । मनसाऽपि गुरोर्भार्य्यां यः शिष्यो याति पापकृत् । स उग्रान् प्रैति संसारानधर्म्मेणेह चेतसा । श्वयोनौ तु स सम्भूतस्त्रीणि वर्षाणि जीवति । तत्रापि निधनं प्राप्तः कृमियोनौ प्रजायते । कृमिभावमनुप्राप्तो वर्षमेकन्तु जीवति । ततस्तु निधनं प्राप्तो ब्रह्मयोनौ प्रजायते । यदि पुत्त्रसमं शिष्यं गुरुर्हन्यादकारणे । आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते । पितरं मातरञ्चैव यस्तु पुत्त्रोऽवमन्यते । सोऽपि राजन् ! मृतो जन्तुः पूर्व्वं जायेत गर्द्दभः । गर्द्दभत्वन्तु सम्प्राप्य दश वर्षाणि जीवति । संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः । पुत्त्रस्य मातापितरौ यस्य रुष्टावुभावपि । गुर्व्वपध्यानतः सोऽपि मृतो जायेत गर्द्दभः । खरो जीवति मासांस्तु दश श्वा

[illegible]

नर्थान् हृत्वा तु पुरुषो मृतो जायेत बर्हिण । हृत्वा रक्तानि वस्त्राणि जायते जीवजीवक । वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानव । छुच्छुन्दरित्वमाप्नोति राजन ! लोभपरायण । तत्र जीवति वर्षाणि ततो दश च पञ्च च । अधर्मस्य क्षय कृत्वा ततो जायेत मानव । चोरयित्वा पयश्चापि बलाका सम्प्रजायते । यस्तु चोरयते तैल नरो मोहसमन्वित । सोऽपि राजन् ! मृतो जन्तुस्तैलपायी प्रजायते । अशस्त्र पुरुष हत्वा सशस्त्र पुरुषाधम । अर्थार्थी यदि वा वैरी स मृतो जायते खरः । खरो जीवति वर्षे द्वे तत शस्त्रेण वध्यते । स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायते । मृगो बध्यति शस्त्रेण गते संवत्सरे तु स । हतो मृगस्ततो मीन सोऽपि जालेन बध्यते । मासे चतुर्थे सम्प्राप्ते श्वापद सम्प्रजायते । श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च । ततस्तु निधन प्राप्य कालपर्य्यायचोदितः । अधर्मस्य क्षय कृत्वा ततो जायेत मानुष । स्त्रिय हत्वा तु दुर्बुद्धिर्यमस्य विषय गत । बहून् क्लेशान् समासाद्य संसारांश्चैव विंशतिम् । तत पश्चान्महाराज ! कृमियोनौ प्रजायते । कृमिर्विंशतिवर्षाणि भूत्वा जायेत मानुष । भोजन चोरयित्वा तु मक्षिका जायते नर । मक्षिकासङ्घवशगो बहून् मासान् भवत्युत । तत पापक्षय कृत्वा मानुषत्वमवाप्नुते । धान्य हृत्वा तु पुरुषो लोमश सम्प्रजायते । तथा पिण्याकसम्मिश्रमशन चोरयन्नरः । स जायते बभ्रुसमो दारुणो मूषिको महान् । दशन् वै मानुष नित्य पापात्मा स प्रजायते । घृत हृत्वा तु दुर्बुद्धि काकमद्गु प्रजायते । मत्स्यमांसमथो हृत्वा काको जायेत दुर्मति । लवण चोरयित्वा तु चौरिकाक प्रजायते । विश्वासेन तु निक्षिप्त यो वै निह्नौति मानव । स गतायुर्नरस्तादृक् मत्स्ययोनौ प्रजायते । मत्स्ययोनिमनुप्राप्य मृतो जायेत मानवः । मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते । पापानि तु नर कृत्वा तिर्य्यग् जायेत भारत ! । न चात्मन प्रमाणन्ते धर्म्म जानन्ति किञ्चन । ये पापानि नरा कृत्वा निरस्यन्ति व्रतै सदा । सुखदु खसमायुक्ता व्याधितास्ते भवन्त्युत । असंवासा प्रजायन्ते म्लेच्छा श्चापि न सशय । नरा पापसमाचारा लोभमोहसमन्विता । वर्ज्जयन्ति च पापानि जन्मप्रभृति ये नरा । अरोगा रूपवन्तश्च धनिनश्च भवन्त्युत । स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयु । एतेषामेव जन्तूनां भार्य्यात्वमुपयान्ति ता । परस्वहरणे दोषा सर्व्व एव प्रकीर्त्तिता । एतद्वै लेशमात्रेण कथित ते मयाऽनघ ! । अपरान् मस्कथायोगे भूय श्रोष्यसि भारत ! । एतन्मया महाराज ! ब्रह्मणो वदत पुरा । सुरर्षीणा श्रुत मध्ये पृष्टश्चापि यथातथम् । मयाऽपि तच्च कात्स्न्र्येन यथावदनुवर्णितम् । एतच्छ्रुत्वा महाराज ! धर्मे कुरु मन सदा" ॥ इ० व० ।

"महापातकजान् घोरान्नरकान् प्राप्य दारुणान् । कर्म्मक्षयात् प्रजायन्ते महापातकिनस्त्विह । मृगश्वसूकरोष्ट्राणा ब्रह्महा योनिमृच्छति । खरपुक्कसवेणानां सुरापो नात्र सशय । कृमिकीटपतङ्गत्व स्वर्णहारी समाप्नुयात् । तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पग" इति । "श्वसूकरखरोष्ट्राणा गोऽजाविमृगपक्षिणाम् । चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति । कृमिकीटपतङ्गाना विड्भुजाञ्चैव पक्षिणाम् । हिंस्राणाञ्चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत् । लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम् । हिंस्राणाञ्च पिशाचानां स्तेनो विप्रः सहस्रश । तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि । क्रूरकर्म्मकृताञ्चैव शतशो गुरुतल्पग" इति । "ब्रह्महा क्षयरोगी स्यात् सुराप श्यावदन्तक । हेमहारी च कुनखी दुश्चर्मा गुरुतल्पग । यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते । अन्नहर्त्ताऽऽमयावी स्यान्मूको वागपहारक । धान्यमिश्रोऽतिरिक्ताङ्ग पिशुन पूतिनासिक । तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचक । यद्वा तद्वा परद्रव्यमपहृत्य बलान्नर । अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुत हविरिति" । "परस्य योषित हृत्वा ब्रह्मस्वमपहृत्य च । अरण्ये निर्ज्जले देशे भवति ब्रह्मराक्षसः । हीनजातौ प्रजायेत पररत्नापहारक । पत्रशाक शिखी हृत्वा, गन्धान् छुच्छुन्दरि शुभान् । मणिमुक्ताप्रवालानि हृत्वा लोभेन मानव । विविधानि च रत्नानि जायते हेमकर्त्तृष्विति" । "मूषिको धान्यहारी, स्याद्यानमुष्ट्र , कपि फलम् । जल प्लव , पय काको, गृहकारी ह्युपस्करम् । मधु दश , पल गृध्रो, गां गोधा, ऽग्नि बकस्तथा । श्वित्री वस्त्र, श्वा रसन्तु, चीरी लवणहारक । प्रदर्शनार्थमेतत्तु मयोक्त स्तेयकर्म्मणि । द्रव्यप्रकारा हि यथा तथैव प्राणिजातय" इति । "द्रव्यस्यापह्रियमाणस्य यादृशः प्रकारास्तादृशा एव प्राणिजातय स्तेयकर्म्मण्यपहर्त्तारो भवन्ति यथा कांस्यहारी हंस इति । अथवा यत्फलसाधनन्द्रव्यमपहरति तत्साधनविकलो यथा पत्नतामश्वहारक इति" मिता० । "ब्रह्महा

[illegible]

अधर्मचारिन् त्रि [illegible]

अधर्ममय त्रि [illegible]

अधर्मात्मन् त्रि [illegible]

अधर्मास्तिकाय पु [illegible]

अधर्मिन् त्रि [illegible]

अधर्मिष्ठ त्रि [illegible]

अधर्म्य त्रि [illegible]

अधवा अव्य [illegible]

अधश्चर पु [illegible]

अधश्चौर पु [illegible]

अधश्शिरस् न [illegible]

अधस् अव्य [illegible]

अधस्तन त्रि [illegible]

अधस्तात्(मा)त् अव्य [illegible]

अधस्मात् अव्य [illegible]

अधस्पदम् न [illegible]

अधामार्गव पु [illegible]

अधारिद्र त्रि [illegible]

अधर्म्म—स्वार्थिकप्रवृत्तिमिति "अधर्म्माच्चेति वक्तव्यमिति" ठकि तु आधर्म्मिक इत्यपत्र त्रि० ।

अधि अव्य० न+धा–कि । अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधिक्रमणार्थे, उपरि, आधिक्ये, अतिशये च । अस्य ऐश्वर्य्ये, स्वत्वे च कर्म्मप्रवचनीयत्वेन तद्योगे सप्तमी, अधि रामे भूः, अधि भुवि राम इति । "अधि अध्ययनं श्वर्य्यमपित्वस्मरणाधिक्षेप" इति गणरत्ने उक्तम् तत्रो-पाध्यायादधीते इत्यादावध्ययने, इङोऽध्ययनार्थकत्वस्य अधिद्योतक । ऐश्वर्य्ये अधिपति , वशित्वे अधीनः, अधि-गतमिमम् अत्या०इ० । स्मरणे मातुरध्येति इक स्मरणार्थत्व-मधिर्द्योतयति । अधिके, अधिकमिति अधि+कन् । "अधि-परी अनर्थकाविति" पा० उक्ते आनर्थक्ये गतित्वाभावात् नोपसर्गत्व तेन अध्यागच्छति इत्यादौ गतिश्चाभावात् "गतिर्गताविति" पा० निघातो न । अतएव अस्य धात्व-र्थमात्रद्योतकत्वेऽपि विशिष्टक्रियाद्योतकत्वाभावात् अन-र्थकत्वव्यवहार विशिष्टक्रियायोगाभावाच्च नोपसर्गत्वम् तेन "तस्मिन्नालवतुर्भागे प्राङ्नाकमधितस्थुषीति" षत्वं न णत्वम् इति च क्रियाविशेषद्योतकत्वे अधितष्ठावित्यादाविव उपसर्गत्वेन षत्वमिति भेद । मुग्धबोधे तु "नालाञ्चायां स्तौ नाविक्रमेऽति पर्य्यधी गताविति" गत्यर्थद्योतकत्वे नोपसर्गत्वमित्युक्तम् तेन नाकमधितस्थुषीत्यस्य गतवती-त्यर्थकस्योपसर्गत्वाभावान्न षत्वमिति विवेक । तथा अधिके, "इतो वा सातिमीमहे दिवो वा पार्थि-वादधि" इति ऋ० १,६,१० "अधीमहे आधिक्येन याचामहे" इति भाष्यम् । उपरि "ये नाकस्याधि रोचने दिवीति" ऋ० १,१९,६, "नाकस्य दुःखरहितस्य सूर्य्यस्य उपरीति" भाष्यम्, अधिकारे "यदत्र मामधि-करिष्यतीति" सि० कौ० । विभाषा कृञीति पा० । वा गतित्वमत्र विनियोक्तुरीश्वरस्य गम्यते अधिकारो विनियोग । आधिक्ये "अधिगत्य जगत्यधीश्वरादिति" नैष० अधिगत्येत्यादौ गमेर्विशिष्टज्ञानार्थत्वद्योतकत्वात् उप-सर्गत्वम् "धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते, तमेव विशिनष्टन्य उपसर्गगतिस्त्रिधे"त्युक्ते विशिष्टज्ञानार्थता, तेन गतिसमासे ल्यप् । "अधिगत विधिवद्यद-पालयदित्यादौ" दायस्तेन लब्धमित्यर्थं । एवमन्य-त्रापि विशेषार्थद्योतकता विज्ञेया । आधीयते दुःखमने-नेति आ+धा–कि वा पु०स्त्रस्व । मन पीडायाम् पु० ।

अधिक त्रि० अध्यारूढ एव स्वार्थे कन् उत्तरपदलोपश्च । प्रधाने अतिरिक्ते, "क्षम न सत्त्वेष्वधिको बबाधे" इति रघु । आधिक्य च योग्यपरिमाणातिक्रम अतिशयश्चद्विध । तत्रानुरूपातिक्रमे "अकालप्रसवा नार्य्य इत्युपक्रमम् "हीना-ङ्गीमधिकाङ्गीश्च जायन्ते यदि वा स्त्रय" इत्यरिष्टसूचकतदा हार्य्यम् । "हीनाङ्गमधिकाङ्गञ्च ब्राह्मभोज्ये विवर्ज्जयेदिति" स्मृति । "इयमधिकमनोज्ञा वल्कलेनापि तन्वीति" शकु० । "अधिकं फलमश्नुते" इति पुरा० । असा-धारणे च । "ब्राह्मणस्याधिक लब्ध, क्षत्रियस्य विजित, निर्विष्ट वैश्यशूद्रयोरिति" गौतम "ब्राह्मणस्याधिक लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना लब्धं तदधिक-मसाधारणम् । क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्त्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम् । "निर्विष्ट वैश्यशूद्रयोरिति" । अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषि-गोरक्षादिलब्धं निर्विष्टन्तदसाधारणं, शूद्रस्य द्विजशुश्रूषा-दिना भृतिरूपेण यल्लब्धन्तदसाधारणम् । एवमनुलोमजाना-मतिलोमजानाञ्च लोकप्रसिद्धेषु स्वस्ववृत्तेषु यद्यदसाधारण-मूल्य स्वतामामश्वसारथ्यमित्यादि तत्तत् सर्वं निर्विष्टशब्दे-नोच्यते सर्वस्यापि भृतिरूपत्वात् "निर्वेशो भृतिभोगयो-रिति" त्रिकाण्डीस्मरणात् । तत्तदसाधारण वेदितव्यम्" इति मिताक्षरा । दर्पणोक्ते अर्थालङ्कारभेदे यथा दर्पणे "आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते" । "किमधिकमस्य ब्रूमो महिमान वारिधेर्हरिर्यत्र । अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि" इत्यत्राश्रयस्य । "युगान्तकालप्रतिस-हृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुद" इति माघे तु आश्रितराधिक्यम् । भावार्थे ष्यञ्–आधिक्यम् । उचित प्रमाणातिरेके न० । [अत्यन्तोत्कृष्टे च ।

अधिकतर त्रि० अधिक+तरप् । द्वयोर्मध्ये उत्कृष्टे एकस्मिन्,

अधिकतम त्रि० अधिक+तमप् । बहूनां मध्ये एकस्मिन् उत्कृष्टे, अत्यन्तोत्कृष्टे च ।

अधिकमास पु० कर्म० । मलमासे तद्विरणमधिमासशब्दे ।

अधिकरण न० अधि+कृ–ल्युट् । आधारे, व्याकरणशास्त्रे "कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति" हरिपरिभाषिते अधिकरणसंज्ञके कर्तृकर्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्न पचतीत्यादौ गृहस्य कर्तृद्वारा, स्थाल्याश्च कर्मद्वारा, परम्परया पाकक्रियाश्रयत्वात्, गृहादे । "आधारोऽधिकरणमिति" "सप्तम्यधिकरणे इति" पा० ।

कर्त्तृत्वं च तस्य कुठारादिना सर्व्वत्र इत्र। तथा कुठस्य काष्ठे कुत्यम्, कुठस्य च संयोगादिकमश्व कुठान्तर-प्रसाधिकरणात्वात तथा कुठारादेर्द्दारादौ काष्ठाधिकरणत्वम् कुठारादेर्द्दारादौ न तु चेतरीय । कुठारादि कुठारादैर व्यापारेण दारुसाधन वा वनेनैव चाधिकरणत्व तत्र कुठारादीनां कर्माधिकरणत्वमित्येव कथनम् । क्रियते निबन्धे विवादोऽस्तित्वम्। पूर्वोक्तवीर्व्वाचाकप्रविदे एकार्थमविवादे निवन्धनपूर्व्वकविहाय निवन्धनारप्रयोगबलात्मतदर्थे न्याये । तथा हि "विप्रतिपित्स्य पूर्वपक्षमेवाह निबन्धति" विवादया माक्येऽधिकरणं पूर्वमिति" मीमांसा । तत्र विषा दाद्धे वाक्यं विषया प्रकारोऽस्ति विषयः इत्थमिति न वेति विकल्प । तत्र वस्तित्वपक्षयोः वयमेव युक्तिप्रदर्शनार्थं पूर्वपक्षतया पूर्वपक्षोक्तौ युक्तिं वक्ष्यति वस्तुतः युक्तिप्रदर्शनमात्रम् विहाय । अत्रैकाधिकारेण विहायविहायौविवर्णनार्थं वाक्य सिद्धान्तवाक्यमिति यथा "स्वाध्यायोऽध्येतव्य" इत्यादिवाक्यं विचारणमेव विषय । समानमथवातमप्यत्र वाक्यमात्रम्? अथ पक्षपर्वत्रेणा अर्थं ? इति संशय । तत्र अर्थप्रत्यक्षतामतमाश्रयणमिति पूर्वपक्ष: । अथवाप्यधिकारपक्षपूर्वमिति सिद्धान्त । तेन निर्विचारिकता वाक्येनैवाध्ययनमिति अधिकोऽर्थे इति निरुक्त कृत अतः प्रतिपादयत्यतस्त्वार्थावबोधो न स्वाध्यायोऽस्तमात्रैवैति। तत् अस्मदादायाम् । अथवा स्वार्थाभावाद्वि इत्यादि तथा अर्थं बोधार्थं निश्चित्यार्थं वेदान्ते चतुर्लक्षणा अध्ययन मीमांसा वाचस्पत्यमेव । "अथातो धर्मजिज्ञासा" इत्यत्र विषय अन्य च भवति सूत्रस्य विहायवेति चतुर्लक्षणा इति भवति "स्वाध्यायोऽध्येतव्य" वाक्ये स्वाध्यायम् क्रिया । अथार्थविचारे वाक्ये प्रवृत्तविचारार्था निरूपेण वाक्यमिति तिष्ठ तैव इति अविकल्प पदनिवृत्तौ रचनी । तत्र वेदान्तविकल्पं तथा "अथातो ब्रह्मजिज्ञासा" इति प्रधानविकल्पम् अविचार्य विचार्यं वा उच्चार्य आचार्यविकल्पात् । अथवेदान्तवाक्यानां न विचारं तत् इति । अथवोऽर्थस्वरूपविवेचनम् तथा अधीतिन् वस्तु स्वाध्यायाध्ययन विचार्यं तथा वेद" इति वाक्य । आचार्यात् तत् ब्रह्म तथा "आत्मा वा अरे द्रष्टव्य श्रोतव्य" इत्यत्र आत्मदर्शनं अवगत्य श्रुताध्ययनेन चरणं विचारयति । अथ च भाव वेदान्तवाक्यानां न्याय वाक्यं विनिर्णयतत्त्वबोधाधिकार इत्येतदधिकारविचार्यं

वाक्य विषया । न भाव विषया: शोधनीयं संबन्धिता, वाक्येऽर्थमपक्षवार्तात् तत् संभवमतीते अधिविचाराक-त्वार्थनिर्णयवाक्यशास्त्रमानादपरिशोधनात् वीर्यं भेदि च त्व च । पूर्वोत्तरपक्षयुक्तिविचार अथ तत्र पक्षेऽनवबोधम् । प्रमाणान्तरमिति सावकाशं विवक्षयोऽनवबोधात् । संदिग्ध हि विचारविषयोऽनवदितत्त्व तत्त्वनिर्णयं तथा हि तत् हि ब्रह्मादैव संदिग्धं च? आत्मादैव? वा भाव "तत्र भावनया अस्ति वाक्येन ब्रह्मात्मत्व निवचन् । न हिताय: अर्थप्रत्यवेतवाचादत्त विषयात् । तत्रापाय निवृत्तेन भावोऽर्थं तत्र इति चेत् न भवताविवर प्राप् तत्प्रसादसविशुद्धभावसौरभाचरणसौरेंद्रिमवतो पूर्वविरक्तसत्त्वोभ्यासादायामात्मैव निश्चयविषय भवति । तथाप्यात्मना अध्ययनात्मा निदिध्यासादिकल्पनात् विचारत्व विषयीऽस्ति । नापि प्रयोजनं तत्र । आत्मप्रभावैव अज्ञानविवर्त्तेऽपि तत्त्वदर्शनात् तथापूर्वा न विचारयति यत: वाक्यमात्रपक्षयोरपि पूर्वत्र । अतोऽत्र है । वाक्यमात्रपक्षौपन विवक्षयोरध्ययनम्त्रम् आत्मसंज्ञानकी: संदिग्धं ब्रह्मज्ञानत्र ।"अथवाया अद्वैत चतुरहर्द्दं ब्रह्मात्मोऽस्तीति । अर्थबहुलतायात्मत्र युक्तिरैश्वर्यादियुक्तप्रकाशैवात्मार्थं ब्रह्माति तथापि संनिरपेक्षतायात्र तथात् संदिग्ध तत्र विषय: वदि यतेन विविक्तत्वं प्रयोजनं सुखा निःश्रेयसं च विषय । तथापरत्वमात्मविचारत्वेन ब्रह्मणो विचारयितव्याय-व्याचक्षीर्णमिति विषय इति । अथेदानीं विषयात्मीय-ब्रह्मविवर्तिभ्रमयते च । "तथाविषयवाक्यावृत्तय: कर्म-वाक्य" इति वा । वेदान्तविषयाः अथेदानीं विवादात् सोऽपयवधाविविक्षाविवक्षितयुक्तयः कर्मोपायत इति "इदमथाविद्यमानाव्यवहारे स्वार्थाभिधरतत्त्वमीति: बीजमवगत भवति वाक्ये बीजमवतात् इत्यादि । अथेदानीं-विहायौ विशिष्टवीर्यविषयदर्शितत्वे अविवक्षयात्मीविवेचिति तथा वर्ण वाक्ये अवैति वाक्ये वक्ष्याम । तथ्यो हि सार्थिक-तावत्युक्तिषु समयुक्तिवेदे च समयुक्तिमत्वे अधिकरणम्। अधिकरणविचारा इ अधिकरणस्य विचार अपवादार्थं नि-चय यत वेद । पुनश्च अवस्थानरवात्वेन संबा-न्तरत्वे विचारो भाव अवेक्षवेद निर्णयते अतीतं संबं निर्णयते इति । इत्थं एवे । अथवा विचारो यथा अधवा वा इत्थं विचारे च अधिकरणस्य संज्ञाया विचार: । अधिकरणविचारे वेदि" वा ।

अधिकरणिक पु० अधिकरणम् धर्म्माधिकरणम् आश्रयतया-ऽस्त्यस्य ठन् । विचारकरणाय धर्म्माधिकरणमण्डपे नियुक्ते प्राड्विवाकादौ । तत्र नियुक्त ठञ् । आधिकरणिकोऽप्यत्र पु० ।

अधिकर्म्म(न्) अव्य० कर्म्मणि विभक्त्यर्थेऽव्ययी० वा अच्समा० । कर्म्माधिकृत्येत्यर्थे । अधिक कर्म्म प्रा०स० । अधिककम्माय । न०व० । अधिककर्म्मयुक्ते त्रि० ।

अधिकर्म्मकर त्रि० अधिक कर्म्म तत्करोति कृ—आनुलोम्यादौ ट । शुश्रूषकभेदे दासभेदे । क्विप् अधिकर्मकृदप्यत्र त्रि० ।

अधिकर्म्मकृत त्रि० अधिक कर्म अधिकर्म तत् कृत येन निष्ठान्तस्य परनि० । "सर्वेष्वधिकृतो य स्यात् कुटुम्बस्य तथोपरि । सोऽधिकर्मकृतो ज्ञेय" इति स्मृत्युक्ते शुश्रूषकभेदे ।

अधिकर्म्मिक पु० अधिकृत्य हट्ट कर्मणोऽस्त्यम् अधिकर्म—ठन् । हट्टाध्यक्षे, हट्टस्थवणिग्भ्य शुल्कादानकर्म्मणि नियुक्ते ।

अधिकाङ्ग न० अधिकोऽङ्गात् । वर्मधरैर्योधैर्हृदयमध्ये वर्मदार्ढ्याय बद्धपट्टिकादौ । व० । अधिकाङ्गवति त्रि० । "अजाविघातने चैव अधिकाङ्ग प्रजायते" इति शाता० ।

अधिकार पु० अधि+कृ—घञ् । आरम्भे, यथेह क्रयविक्रयादिकर्त्तृत्वसम्पादके स्वामित्वे, "अधिकार फले स्वाम्यमधिकारी प्रभुर्भवेदिति" मीमांसोक्ते विहितकर्म्मफलस्वामित्वे, विनियोज्यपुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राह्मणादे, राज्ञ प्रजापालनादौ, वैश्यस्य कृष्यादौ, शूद्रस्य द्विजसेवायाम्, "नैमित्तिकोऽय प्रायश्चित्ताधिकार" इति मिताक्षरा । स्वामित्वे—"सर्व्वे स्युरधिकारिण" इति स्मृति । तत्र च वैदिकादिकर्म्मसु कर्त्तव्यताज्ञानाधीनप्रवृत्तिहेतुरधिकार । यथा याजनादौ ब्राह्मणस्येत्यादि । शूद्रस्य नाध्ययनादिष्वधिकार यथोक्त "निषेकादिश्मशानान्तो यस्य वेदोदितो विधि । तस्य शास्त्रेऽधिकारोऽस्मिन्नान्यस्यैव कदाचनेति" मनुना । न केवलम् अध्ययने शूद्राणामधिकार यागादावप्यनधिकार यथोक्त जैमिनीयसूत्रभाष्यादौ । "चातुर्वर्ण्यमविशेषात्" इत्याशङ्क्य "निर्द्देशाद्वा त्रयाणा स्यादग्न्याधेये ह्यसम्बन्ध क्रतुषु ब्राह्मणश्रुतिरित्यात्रेय" इति । 'वाशब्द पक्ष व्यावर्त्तयति, "त्रयाणाम्" अधिकार स्यात् कुत ? अग्न्याधेये निर्द्देशात् अग्न्याधेये त्रयाणां निर्द्देशो भवति, "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य , शरदि वैश्य" इति शूद्रस्य आधाने श्रुतिर्नास्ति इत्यनग्नि शूद्र असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम् । तस्मात् "अग्निहोत्र जुहुयात् स्वर्गकाम" इत्येवमादि शूद्रस्य प्रापिका श्रुतिर्नास्ति । ब्राह्मणादीन् एवाधिकृत्य सा प्रवर्त्तते, ते हि समर्था अग्निमत्त्वात्, आहवनीयादयो न शूद्रस्य, अविधानात्, संस्कारशब्दत्वाच्च आहवनीयादीनाम् । तस्मात् अनधिकृतोऽग्निहोत्रादिषु शूद्र इत्यात्रेय मन्यते स्म" इति भा० । तथा कर्मप्रतिपादक सर्वशास्त्र विहितकर्मसु मनुष्याणामेवाधिकार न तिरश्चा न वा देवादीना यथोक्त तत्रैव "फलार्थत्वात् कर्मण शास्त्र सर्वाधिकार स्यात्" इत्याशङ्क्य "कर्त्तुर्वा श्रुतिसंयोगाद्विधि कार्त्स्न्येन गम्यते" इति सू० "वाशब्द पक्ष व्यावर्त्तयति । न चैतदस्ति तिर्यगादीनामपि अधिकार इति । कस्य तर्हि ? । य समर्थ कृत्स्न कर्म अभिनिर्वर्त्तयितुम् । न चैते, शक्नुवन्ति तिर्यगादय कृत्स्न कर्माभिनिर्वर्त्तयितुम्, तस्मात् यथा न सुखस्याभ्युपाय कर्म, कथ यो न शक्यते कर्त्तुम्, सोऽभ्युपाय स्यात् ? इति । न देवाना, देवतान्तराभावात् न हि आत्मानम् उद्दिश्य त्याग सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, आर्षेयाभावात् न भृग्वादयो भृग्वादिभि सगोत्रा भवन्ति, न चैषा सामर्थ्य प्रत्यक्षम् । "अपि च तिर्य्यञ्चो न कालान्तरफलेन अर्थिन , आसन्न हि कामयन्ते । "ननु च उक्त, कालान्तरफलार्थिन तिरश्च पश्याम , शुन श्येनायतदुद्दिश्याम् अष्टमश्यां च उपवसत " इति उच्यते न जन्मान्तरफलार्थिन उपवसन्ति । 'कथ अवगम्यते ? वेदाध्ययनाभावात्, ये वेदमधीयते ते एतद्विदु , "इद कर्म कृत्वा, इद फलमत्र प्राप्नोति इति" न चैते वेदमधीयते, नापि स्मृतिशास्त्राणि, नाप्यन्येभ्य अवगच्छन्ति, तस्मात् न विदन्ति धर्मम् । अविद्वास कथम् अनुतिष्ठेयु , तस्मात् न धर्माय उपवसन्ति इति । किमर्थस्य तर्ह्येषाम् उपवास ? । उच्यते, रोगात् अरुचिरेषाम् । कथ पुनर्नियते काले रोगो भवति ? । उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकचातुर्थकादीति । तस्मात् मनुष्याणाम् अधिकार इति । न च तिरश्चां द्रव्यपरिग्रह , न हि एते द्रव्य स्वेच्छया उपयुञ्जाना दृश्यन्ते, तस्मात् अनीशाना धनस्य । यत्तु, देवग्रामो क्षेत्रग्राम इति, उपचारमात्र तत् । तस्मात् अपि न तिरश्चाम् अधिकार इति । यानि पुनर्लिङ्गानि, "देवा वै सत्रमासत" इत्येवमादीनि, अर्थवादा ते विधिप्ररोचनार्था । विद्यते हि विधिरन्य तेषु सर्वेषु,

न च विधिर्विधेयस्याप्रमाणो भवेदि स्वरूपाविशेषात् । सुविद् वा दर्शं माव समापि नाधिकाराणि यद् प्रयत्नशा यदि नायते तैरा: नाममूच्यता यदि विधेय यथेष्टम यदि स्यात्य । किन्तु पुनरुक्तिदोषो यद्भवा इति वा । प्रकृतिप्रयागात् यतो दैनाहोमाधिकार इति "प्रकृतवदिति शाद्दरायणः प्रयाणात्" इति वा क्रमेण आरम्भाधिर्न व्याख्यानवत् वाद्दरायणेन यथा "वाद प्रकृत्यानधिकारेऽपि याक्तम तु प्रकृत्यायेऽपि प्रकृतिप्रयावे विकरोऽपि तैर्न प्रकृत्याप्रतरिहात् वै देवानवताय अधिकरोति याक्तविदि वाद्दरायण आचार्यौ मन्यते प्रभवात् ? प्रभवात् । स्वयमपि हि तैत्तरीयविज्ञानार्थाय-कारणात्वम् । प्रमाणैरिच वायन् बोधविधेयं देवादीना यदि स्वयमपि विद्यार्थिविज्ञानयोधिकारार्थिविधि-यत् । तथा वाचस्पतिरपि तैर्न प्रयाणि प्रमाणं नारोऽपि प्राग्दृष्टवाक्येभ्यो विपक्षमप्राप्तत्वात् । यत् देवां वचित् प्रतिषेधोऽस्ति । यतोऽपवादविद्याऽर्थेनाधिकारो निर्दिष्टः प्रमाणम् वेदाध्ययनात् स्यात् देवानां यथ प्रतिपादनेयनात् । यदि वयं विद्याव्यवहारं प्रकृ यमोऽपि दर्शनादि"स्वरूपं च वै दर्शनविषयात् प्रमाणो प्रकृत्यवशात्" "पद्मे" नारविन्दे" विरहशयनाद् पयोऽपि यथो । प्रश्नोऽपि" । यदि कर्मकाण्डविधिकारणत्व-स्वत् न देवानां तैत्तरीयसम्पात् । न कर्मोपासनैर्यागत्यागदानादिकं । न सतिप्रयासमि न चीनकर्मणां विद्याधिविधिरतायायविकृष्टप्रदेशेन विशिष्य प्रामाणिक न च कर्माद्देशो कर्मादिष्वप्रयत्नः । अथाप्युपदेशानां यदि विद्याधिकारः किंन नार्हेत ? इति" । तत्र विश्वकर्मकर्मादिष्व-तत्तत्कर्मकरणप्रयत्नार्थमङ्कादि अधिकारनियोगशालीति विवद् प्रजापि विद्याधैन सर्व कर्मेणामधो ज्ञायते विद्वानधिकार इति सर्वस्मादि-प्रयत्न विद्यानामधिकार इति वैयाकरणम् । अधिकारी मुख्य । अधिकारविवक्षायां व्याकरः । यथा प्रयोगविज्ञान प्रमाणादिसमविकार "प्रमा-णाधिकारो बहुधिकारी आसीदि व्याकरण । "वाक् नाधिकारी स्व इति" विद्यो । "पूर्वाधिकारी अधिकारिणि" स्मृति । अयमि यत् । "अथमे "नाधिकारे प्रथम" इति वैव । प्रकरणे आचरक-माणे प्रकरणीयावसरदेवताम कर्मेषु अहकर्मेणे । उपकारीयत् वा प्रकृत्याव्यवसायोऽर्थिरि" ति श्री ।

प्रमाणेयस्य प्रमाणादिष्वर्थप्राप्तचतुष्टयापरकरण पूर्व कर्मोपायस्वरूपानुवर्तनम् । यथा "प्रमाण रस इति कर्मोपायमवरणस्रुतो वा प्रकृत्यानावस्थाः सम्यक् कर्मेव बहुलकम् । न चाधिकार: निर्विष "विद्यामोहित यत प्रत्युत्पन्नहेतु च । महाप्रमाण-मपि अधिकारविधा यह" एकार्थविषयात् । मनुराजस्वम् आत्मन्वेषणम् । विशेषकारा निर्णी-यते "कर्माधिकारं माक्रमिति" च च । यद्विषायेव "वाद प्रकृत्यानधिकारेऽपि याक्त"मिति प्रकृत्याधिकार त्यागप्रकरणेऽपि" च च मा । स्वयमधिकरोति सर्वकर्म-णो यत् तथैव प्रकृत्याधिकारत्वाविशेषापि

अधिकारविधि पु अधिकारे बहवास विधिविधायक । बोधायनोक्ते विधिभेदे कर्मजन्यफलभोक्तृत्वप्रबोधके विधौ यथा कार्यकालो यजेत स्वर्गकाम इत्याचयनप्रयोज्या स्वर्गा-दोषि ज्ञायते । यत् विधि व्याप्तार्थनाविधिः अधिकारः यथा "राजा राजसूयेन यजेति" अत्र राजसूये राज पद विशेषकत्वम् प्रयत्नकालक प्रभावम् अधिकारवि विविमि च ।

अधिकारिता स्त्री अधिकारिणो भावः तल् । विधान-कालविधिकर्तृवत्स्वत्विज्ञानमन्त्रैकत्वाय योग्यत्वे अधिकारे "साध्यार्थविद्योपादाय—नास्ति अधिकारितेति" सर्वि । भावार्थे स । अधिकारित्वम् अत्रार्थे न ।

अधिकारिन् त्रि अधिकरोति अधि+कृ—णिनि । कर्मणि विधिविहितकर्मफलभोक्तरि, साक्षेप स्वकर्मोदेशेन विधी-यते, स्वस्वविहितकर्म-प्रयोजनोद्देशेन कर्मणि न क्रियते । देवास्वयमि बहुवत्सरसाध्यानि बहुयज्ञानि देवा-नाहि देवानामसामर्थ्यानि मन्यते तत्तदधिकारनिषेधात "अधिकारी च विधिविहितवैदिकप्रमाणनिर्णायकोऽधिका-रित्वेदाना इव यज्ञादि प्राप्तं ना आधाधिविधि कर्माधिकरणे विश्वदेवविहिताधिकारविशेषात्प्रमाणेन विषयविनियोगशास्त्रार्थ विरोधाविर्भावाय । वाक्य-प्रयोजनाय प्रमाति"प्रकृत । न अधिकारी स्वकर्म-कार्यतैव विविधा: "अधिकारिविहिताय विधान" इति "अधिकारिविधेय विधान" इति च योजनामात्र यतोऽपि । अत्र प्रयत्नाधिकारिता विधानेन विधिविहितकर्मानुष्ठानपूर्वकं निरायासप्रयासैरधिकार बहुधाधिकारिण विविध-कर्मोत्पादितसर्वकारपूर्वकं बोधाविकृतीनाम्रे यज-मान तु सर्वार्थविधिविहितम विधानपूर्वकं वाक्यजन्योप-

सने "ये मन्त्रास्ते तु सज्जन्ते ब्रह्मणोरूपकल्पने" इत्युक्तेः। अतएवोक्तम् "प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे–प्रदेयमेतत् सततं मुमुक्षवे इति। अत्र यथोक्तकारिणे इत्यनेन प्राक् ज्ञानोत्पत्तेः वर्णाश्रमविहित कर्मानुष्ठेयमेवेत्युक्तं शा॰ सूत्रकृताऽपि "विहितत्वाच्चाश्रम कर्मापि" इत्युक्तम् गीतायामपि "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यनेन आरुरुक्षोः यथोक्तकर्माधिकार उक्तः "कषाये कर्मभिः पक्वे ततोज्ञानं प्रजायते" इत्यनेन कषायशब्दवाच्यचित्तदोषक्षयार्थं कर्मापेक्षकतेत्युक्तम्। "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति" श्रुतावप्यधिकारिभेदात् निराकारसोपाधिकयोः द्वयोर्ब्रह्मणोर्वेद्यतोक्ता। गीतायामपि "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया नघ! ज्ञानयोगेन साङ्ख्यानां, कर्मयोगेन योगिनामिति" अधिकारिभेदात् ज्ञानकर्मणोरधिकार इत्युक्तम्। "समग्रं ससाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण सदा पार्थ! काम्यं कामान्वितेन चेति" भवि॰पु॰। "अधिकारिणाऽर्थिना विदुषा समर्थेनेति" रघु॰ तेन विदुषः तत्तत्कर्मजन्यफलार्थित्वम् तत्तत्कर्मकरणयोग्यत्वम् अपर्युदस्तत्वञ्च अधिकारिताप्रयोजकम्। तत्र फलार्थित्वञ्च सति कामे एव, मुमुक्षुत्वे तु न फलार्थित्वापेक्षकतेति भेदः। मार्कण्डेयपुराणे रुचिवाक्येन "पितृभ्यस्ते दिवि ये च मूर्त्ताः स्वधाभुजः काम्यफलाभिसन्धौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेष्विति" अनेन फलार्थिनं प्रति तत्तत्फलदातृत्व, तदनर्थिनं मुमुक्षुं प्रति मुक्तिदातृत्वमिति स्पष्टमुक्तम् एवं देवतानामप्यधिकारिभेदेन फलदातृत्वम्। अनभिसंहितेषु अनुद्दिष्टेषु फलेष्वित्यर्थः। अधिकारोऽस्त्यस्य इनि। स्वामित्ववति "सर्वे सुरधिकारिणः" इति स्मृतिः स्त्रियां ङीप्। "तताम देवी वचनाधिकारिणीति" नैष॰।

अधिकार्थवचन न॰ अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्मादतिरिक्तस्य गुणस्य वचनम्। स्तुत्यर्थवादे, निन्दार्थवादे च। यथा वातच्छेद्यं तृणमित्यत्र दुर्बलत्वेन निन्दा, काकपेया नदीत्यत्र च पूर्णजलत्वेन स्तुतिः गम्यते "तत्थैरधिकार्थवचने" इति पा॰।

अधिकाम पु॰ अधिकः कामः। अत्यन्ताभिलाषे। ब॰। तद्वति त्रि॰। कामे विभक्त्यर्थे अव्य॰। काममधिकृत्येत्यर्थे अव्य॰।

अधिकृच्छ्र पु॰ अधिकं कृच्छ्रं कष्टं साधनतयाऽस्त्यस्य अच्। "विस्तैरासनकर्यापि कथितैरथवा शुभे। मासेन लोकेऽधिकृच्छ्रः कथ्यते द्विजसत्तमैः" इति (गरुड़पु॰) उक्ते माससाध्ये व्रतभेदे। प्रा॰स॰। अधिककष्टे न॰। तद्वति त्रि॰।

अधिकृत पु॰ अधि+कृ–क्त। आयव्ययाद्यवेक्षणे अध्यक्षे कर्म्मजन्यफलसम्बन्धिनि नियुक्ते, स्वामित्ववति च त्रि॰। "महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीरिति" रघु।

अधिकृति स्त्री अधि+कृ–क्तिन्। अधिकारे। [आरोहणे।

अधिक्रम पु॰ अधि+क्रम–भावे घञ् अमन्तत्वान्न वृद्धिः।

अधिचित् त्रि॰ अधि+भावे कर्त्तरि वा क्विप्–तुक् च। परिचये, तत्कारिणि च। "विगामासामभयामामधिचितम" ऋ॰ १०.६१,२४।

अधिक्षिप्त त्रि॰ अधि+क्षिप–क्त। स्थापिते, निन्दिते कृताधिक्षेपे, प्रेरिते, तिरस्कृते च।

अधिक्षेप पु॰ अधि+क्षिप–भावे घञ्। तिरस्कारे, स्थापने प्रेरणे च।

अधिगत त्रि॰ अधि+गम कर्मणि-क्त। प्राप्ते, ज्ञाते च। "अधिगतं विधिवत् यदपालयदिति" रघु "अधिगतसकलकलाकलापकमिति" का॰। "अधिगताखिलवेदार्थ", इति वे॰भा॰।

अधिगम पु॰ अधि+गम–घञ्। ज्ञाने, प्राप्तौ, स्वीकारे च। "अध्यात्मयोगाधिगमेनेति" गीता। निश्चये प्राप्तौ च। "स्वार्थे भक्तृयक्रयसविभागपरिच्छेदाधिगमेष्विति" गौत॰। "अधिगमो निश्चये प्राप्तिरिति" मिता॰।

अधिगव अव्य॰ गवि विभक्त्यर्थे अव्ययी॰ वेदे अच् समा॰। गवीत्यर्थे "स्वादीयो यदधिगव क्षीरमिति" वेद॰।

अधिगुण पु॰ अधिको गुणः प्रा॰स॰। अतिशयितोत्कृष्टयोरगुणे। ब॰। तद्वति त्रि॰। "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इति नीति॰। गुणे–विभक्त्यर्थे अव्ययी॰। गुणमधिकृत्येत्यर्थे अव्य॰। अधिगतो गुणो येन। ज्याधिरूढे धनुषि न॰।

अधिजिह्व पु॰ अधिका जिह्वा यस्य। द्विजिह्वे सर्पे तस्य द्विजिह्वत्वञ्च अमृतास्वादाशया कुशविलेहनात्। यथोक्तं भा॰आ॰प॰। "यत्रैतदमृतञ्चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय स्म ते सर्पाः प्रतिमायास्तदा तत्। सोमस्थानमिदञ्चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधा कृता जिह्वा सर्पाणां तेन कर्मणा। अभवंश्चामृतस्पर्शाद्दर्भास्तेऽथ पवित्रिणः। एवं तदमृतं तेन हृतमाहृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना" इति।

अधिविन्निका स्त्री अधिवेदनं कृतमस्याः अधिविन्ना अधिविन्ना। (आवृत्तिश) अधिविन्नायाम्।

अधिश्रय पुं आश्रयणं आश्रय। आश्रयो वा। आरोहिणादौ यद्वत् "तस्मिन्नाधिश्रयणे" इति भट्टिः।

अधिज्योतिष अव्य ज्योतिषि इत्यर्थे अव्ययी अव्य। सूर्यादिज्योतींष्यधिकृत्य अर्थे।

अधित्यका स्त्री पर्वतस्योपरिभूमिः। पर्वतोपरिभूमी। "आसन्नं सत्यधित्यकेति" इति कोषः। "भान्तुं सान्द्रमधित्यका मधिवसेति" इत्यादि। "अधित्यकास्वधिवसन् आह्वयामिति" रघुः।

अधिदन्त पुं दन्तस्योपरि दन्तम् यत्र सः। दन्तोपरि जातदन्ते (गजदन्त)। शब्द। अस्ति लिं०। दन्ते इत्यर्थे अव्ययी। दन्तानधिकृत्य अर्थे अव्य।

अधिदेव पुं अधिष्ठातृदेव इष्टदेवतायाम् मा०१४। सर्वेषामधिष्ठाने परमेश्वरे। देवे इत्यर्थे अव्ययी। देवमधि अधिकृत्य अर्थे अव्य। अधिदैवं मनः तस्य। अध्यात्मिका दिव्यदृष्टि। आधिदैविक दैविको व्याधि इत्यादि लिं।

अधिदेवता स्त्री अधिष्ठात्री देवता या सा। अधिष्ठात्री देवतायाम्। देवतायाम् अधिष्ठातृत्वे अधिष्ठान आलेख इत्यादीनां यथायथं नियन्तृत्वम्। तत्र साक्षात् परमेश्वरस्य सर्वेषाम् इ च अधिष्ठातृत्व माध्यन्दिने। "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं, योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद, यस्याग्निः शरीरं, योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो वायौ तिष्ठन् वायोरन्तरो यं वायुर्न वेद, यस्य वायुः शरीरं, यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो दिवि तिष्ठन् दिवोऽन्तरो यं द्यौर्न वेद, यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न वेद, यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं, यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यस्तमसि तिष्ठंस्तमसोऽन्तरो यं तमो न वेद, यस्य तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यं तेजो न वेद, यस्य तेजः शरीरं, यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतम्। अथाधिभूतम्। यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं, यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतम्। अथाध्यात्मम्। यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद, यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ् न वेद, यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद, यस्य चक्षुः शरीरं, यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो मनसि तिष्ठन् मनसोऽन्तरो यं मनो न वेद, यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यस्त्वचि तिष्ठंस्त्वचोऽन्तरो यं त्वङ् न वेद, यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो विज्ञाने तिष्ठन् विज्ञानादन्तरो, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो रेतसि तिष्ठन् रेतसोऽन्तरो, यं रेतो न वेद, यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तम्" इति। अत्रैतेषां विवेकार्थमिदमुक्तम् दिवाकर्विधानादिदेवतानामधिभूताधिदैवं यथा यथादिव्यवहारात् न वैतानिक सूत्र। दिव्यानामधिदेवतानां अधिभूतधिदैवतम्" इति चार। अधिदेवताधिदैवतस्यैतदेतत्स्वरूपं प्रमाणमात्मनः। अत्र

तृप्तद्देवानाञ्च वैकारिकत्वमिति' राघवभट्टेन व्याख्यातम् । "वैकारिका दिगाद्याश्च चन्द्रेर्येकादश स्मृता । इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति तद्धृताभियुक्तोक्तेः । तथा च श्रोत्रस्य दिक्, त्वचो वात, नेत्रस्य अर्क, रसनाया वरुण, घ्राणस्य अश्विनौ, वागिन्द्रियस्य वह्नि, हस्तस्य इन्द्र, पादस्य उपेन्द्र, पायो मित्र, उपस्थस्य (क) प्रजापति, मनस चन्द्र, इत्येते एकादशेन्द्रियाणामधिष्ठातृदेवाः । "ईश्वरं भास्करे विद्यादुमां विद्यान्निशाकरे । स्कन्दमङ्गारके विद्याद्बुधे नारायणं विदुः । गुरौ वेदनिधिं विद्यात् शुक्रे शक्रो विधीयते । शनैश्चरे यमं विद्याद्राहो काल तथैव च । चित्रगुप्तोऽधिप केतोरित्येते ग्रहदेवता" इति (मत्स्यपुरा०) उक्ता ग्रहाणामधिदेवाः । एतेषां पुनरधिष्ठातृदेवाश्च प्रत्यधिदेवतात्वेन व्यवह्रियन्ते ते च प्रत्यधिदेवताशब्दे दर्शयिष्यन्ते । अधिदेवताप्यत्रैव । "आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः" इति मत्स्यपु० । "शयाङ्गमूर्त्तेरधिदेवताकृतिरिति" भट्टिः । चन्द्राधिदेवता उमा ।

अधिदैवत न० अधिष्ठातृ दैवतम् प्रा०स० । अधिदेवताशब्दार्थे "शिवाधिदैवतं ध्यायेत् वह्निमत्यधिदैवतमिति" "विचिन्त्यो माधिदैवत"मिति च विष्णुध०पु० । दैवते विभक्त्यर्थे अव्ययीभाव । दैवतमधिकृत्येत्यर्थे अव्य० । "अथाधिदैवतम् आदित्यो वा" इति छान्दो० उ० "इत्यधिदैवतमिति बृ०उ०" । अधिदैवमप्यत्र अव्य० । "अधिदैवं किमुच्यते इति" गीता ।

अधिनाथ पु० अधिको नाथ प्रा०स० । अधीश्वरे । "तत्राधिनाथमधिकृत्य दिवस्तथाभादिति" मेघ० ।

अधिनाय पु० अधिनीयते वायुना गन्धाधारसूक्ष्मांशनयनद्वारा तत्तत्स्थानं प्राप्यतेऽसौ अधि+नी—घञ् । गन्धे ।

अधिप पु० अधिपाति अधि+पा—क । प्रभौ ईश्वरे । "अथ प्रजानामधिप प्रभाते" इति रघु । "श्रियः कुरूणामधिपस्येति" भार० ।

अधिपति पु० अधिक पति, अधि+पा—डति वा । ईश्वरे स्वामिनि "स वा एष सर्वेषां भूतानामधिपतिरिति" श्रुति । "सर्वस्याधिपतिर्हि स" इति मनु । "ततो भुजङ्गाधिपतेः फणाग्रैरिति" कुमा० । पत्यन्तत्वात् भावादौ यक् आधिपत्यम् । अत्यन्तैश्वर्ये न० । "शैलाधिपस्य स्वयमन्वतिष्ठदिति" कुमा० । सपूर्व्वपदकत्वात् स्त्रियां ङीप् नकारान्तादेश । "विष्टम्भिनीं दिशामधिपत्नीमिति यजु० १४,५, "अधिपत्नीं स्वामिनीमिति" दीप ।

अधिपा त्रि० अधिपाति अधि+पा क्विप् अधिपतौ, अधिपालके च "त्वयेदग्नसत्वधिपा उ अस्मोऽस्मि" ऋ०७,८८,२ ।

अधिपु(पू)रुष पु० अधिक उत्तम पु(पू)रुष प्रा०स० । परमेश्वरे । पु(पू)रुषे विभ० अव्ययी० । पु(पू)रुषमधिकृत्येत्यर्थे अव्य० ।

अधिप्रज त्रि० अधिका प्रजा यस्य । बहुप्रजायुक्ते । प्रा०स० । [बहुप्रजायां स्त्री ।

अधिभू पु० अधिभवति स्वामीभवति सामर्थ्येनाधि· अधि+भू—क्विप् । प्रभौ ।

अधिभूत अव्य० भूतेषु विभ० अव्ययी० । भूतान्यधिकृत्येत्यर्थे "अधिभूतं किमुच्यते" इत्यर्जुनप्रश्ने "अधिभूतं क्षरो भाव" इति भगवदुत्तरम् इति गीता । "भूतं प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते" इति श्रीधर । अधिभूत भव अनुशतिका० द्विपदवृद्धि आधिभौतिकम् । भूतान्यधिकृत्य जाते तु स्वादौ त्रि० ।

अधिभोजन न० अधिकमत्यन्त भोजनम् प्रा०स० । अत्यन्तभोजने । भोजनं निरुक्ते धननामसु पठितम् अधिकं धनं मूल्यं यत्र । अतिमूल्यलभ्ये वस्तुनि त्रि० । "दश वस्त्राधिभोजना इति ऋ०६,४७,२३ अधिभोजना अधिकधनं मूल्यं येषां तादृशानि दश वस्त्राणीति भाष्यम् ।

अधिमन्थ पु० अधिक मथ्यतेऽनेन अधि+मन्थ—करणे घञ् । "उत्पाटयत इवात्यर्थं नेत्रे निर्मथ्यते तथा । शिरसोऽर्द्धं तु य विद्यादधिमन्थ स्वलक्षणैः" इत्युक्ते अरणिकाष्ठमन्थनाख्यरोगभेदे ।

अधिमांस न० अधिक मांसमत्र । "विस्तीर्णं मृदु बहुलं यकृत्प्रकारं श्यावं वा तदधिमांसमाहुः विद्यादिति वैद्यकोक्ते रोगभेदे ।

अधिमांसक पु० अधिको मांसो यत्र ब० कप् । "हन्मूले पश्चिमे दन्ते महाशोथो महारुज । लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः" इति वैद्यकोक्ते दन्तरोगविशेषे ।

अधिमात्र त्रि० अधिका मात्रा यस्य अधिक प्रमाणमस्य मात्रच् वा । अधिकप्रमाणे ।

अधिमास पु० अधिको रविमासादतिरिक्त शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मास प्रा०स० । मलमासे 'असङ्क्रान्तमासोऽधिमासो निरुक्त' इति स्मृत्युक्तो रविसङ्क्रान्तिवर्जितो मासोऽधिमास । तथा हि "मीनादिस्थो रविर्येषामारम्भप्रथमे क्षणे । ते चैत्राद्या" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भ स चैत्र एव मेषस्थरवारब्धो वैशाख

शशाङ्कस्य मासाः पृथक् सूर्य्यमासैर्विहीनास्तु कल्पेऽथवा तेऽधिमासा इति"। इष्टवर्षेऽधिमासानयनं तत्रैवोक्तं यथा "कथितकल्पगतार्कसमागणो रविगुणो गतमाससमन्वितः। खदहनैः(३०) गुणितस्तिथिसंयुतः पृथगतोऽधिकमाससमाहतात् (१५९३३००००००)। रविदिनाः (१५५५२००००००००)प्तगताधिकमासकैः हतदिनैः सहितो द्युगणो विधौ" इति। अत्र वासना कल्पगताब्दाः द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्त्रिंशद्गुणा इष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युता एवन्ते सौरा जातास्तेभ्यः पृथक् स्थितेभ्योऽधिमासानयनं त्रैराशिकेन, यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति फलम् गताधिमासाः। ते दिनीकृताः पृथक् स्थित सौराहर्गणसहितश्चान्द्रो भवति यतः सौरचान्द्रान्तरमधिमासदिनान्येव" इति। सूर्य्यसिद्धान्तेऽप्युक्तम्। "भवन्ति शशिनो मासाः सूर्य्येन्दुभगणान्तरम्। रविमासोनितास्ते तु शेषाः स्युरधिमासकाः" इति। सूर्य्यचन्द्रभगणयोरन्तरं चन्द्रस्य मासाः भवन्ति ते चान्द्रमासा रविमासोनिताः सन्तः शेषा अवशिष्टा ये चान्द्रमासास्तेऽधिकमासा एव भवन्ति मान्ये। अनेन चान्द्रस्याधिमासानां स्पष्टीकृतम्। अत्रोपपत्तिः। त्रिंशत्तिथ्यात्मकस्य रवीन्दुयुतिकालरूपदर्शान्तावधेश्चान्द्रस्य, द्वादशराशिमितेन सूर्य्येन्द्वन्तरेणैव सिद्धिः कथमन्यथा दर्शान्ते जातस्य मन्दशीघ्रयोः सूर्य्येन्द्वोर्योगस्य पुनर्दर्शान्ते सम्भवः। द्वादशराश्यन्तरं चैकं भगणान्तरमतो भगणान्तरेण चान्द्रो मासः सिद्धः। सौरमासापेक्षया यदन्तरेण चान्द्रमासानामधिकत्वं त एवाधिमासा इति।

अधियज्ञ पु० अधिकृतो यज्ञो यस्मात् प्रा०स०। परमेश्वरे। "अधियज्ञः कथं? कोऽत्र" इत्यर्जुनप्रश्ने। "अधियज्ञोऽहमेवात्र देहे देहभृतां वर!" इति भगवदुत्तरम् गीतायाम्। "अत्रास्मिन् देहेऽन्तर्यामित्वेन स्थितोऽहमधियज्ञः यज्ञादिकर्मप्रवर्त्तकस्तत्फलदाता चेति" श्रीधरः। यथा च तस्य सर्व्वान्तर्यामित्वं तथा अधिदेवताशब्देऽन्तर्यामिब्राह्मणे पुरस्ताद्दर्शितम्। यज्ञे विभ० अव्ययी०। यज्ञमधिकृत्येत्यर्थे अव्य०। अधियज्ञं ब्रह्म जपेदिति मनुः, यागे विभ०अव्ययी०। अधियागमित्युक्तार्थे अव्य०। अधिकः अधिकाङ्गयागः प्रा०स०। अधिकाङ्गे यागे पु०।

अधियोग पु० अधिकोयोगः प्रा०स०। ज्योतिषप्रसिद्धे यात्रिकशुभयोगे। स च गमनसमयलग्ने—तस्माद्वा षष्ठे, पञ्चमे, सप्तमे, नवमे, दशमे, वा आयतमस्थाने शुभजीवभार्गवाणां मध्ये द्वयोः स्थितौ सत्यां भवति। "योगे क्षेममथाधियोगगमने क्षेमं रिपूणां वध इति" मुहू०।

अधियोध पु० आधिक्येन युध्यति अधि+युध—अच्। अतियोद्धरि। विभ०अव्ययी०। योधे इत्यर्थे अव्य०।

अधिरथ अध्यारूढः रथं रथिनम् अत्या०स०। अतिरथे। कर्णपितरि पु०। "विवेशाधिरथोरङ्गं यष्टिप्राणो ह्वयन्निवेति" भा० आदि०। तस्यापत्यम् इञ्। आधिरथि कर्णे पु०। कर्णपर्व्वणि भूरिप्रयोगोऽस्य।

अधिराज् पु० अधिराजते अधि+राज—क्विप्। साम्राज्यवति, नृपे, सम्राज्नृपे च "प्रायोपविष्टो गङ्गायामनादृत्याधिराट् श्रियमिति" भाग०। अधिकशोभान्विते त्रि०।

अधिराज पु० अधिको राजा टच् समा०। अधीश्वरे साम्राज्यवति, नृपे च। "शैलाधिराजतनया न ययौ न तस्थाविति" "हिमालयो नाम नगाधिराज" इति च कुमा०।

अधिराज्य न० अधिकं राज्यं प्रा०स०। साम्राज्ये। "अत्यन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभागिति"।

अधिराष्ट्र न० अधिकृतं राष्ट्रमत्र प्रा०ब०। राज्ये। विभ० अव्ययी०। राष्ट्रमधिकृत्येत्यर्थे अव्य०।

अधिरुक्म त्रि० अधिगतं रुक्मम् आभरणं येन प्रा०ब०। अधिगतसुवर्णाभरणे मानवे। "अधिरुक्मा विभीयते" इति ऋ० ८,४६,३३, "अधिरुक्मा अधिकरुक्माभरणेति" भाष्यम्।

अधिरूढ त्रि० अधि+रुह—कर्त्तरि—क्त। उपरिभागे आरोहणकर्त्तरि, अतिवृद्धिमति च। [यत्नेनारोपिते।

अधिरोपित त्रि० अधि+रुह—णिच्—पुक् कर्मणि क्त। अति-

अधिरोहण न० अधि+रुह भावे—ल्युट्। उपर्य्यारोहणे। घञ्। अधिरोहोऽप्यत्र पु०।

अधिरोहणी स्त्री अधिरुह्यतेऽनया अधि+रुह—करणे ल्युट्। (मइ) इति, (सिंड़ि) इति च प्रसिद्धे काष्ठवंशादिनिर्मिते उच्चस्थानारोहणसाधने सोपानभेदे। अधिरोहसाधनत्वेनास्यास्तथात्वम् इति। अधिरोहिणीत्यप्यत्र इति शब्दकल्पद्रुम सम्मूल मृग्यम्। रायमुकुटादिभिः ल्युटैव तत्पदसाधनात्तस्य ह्रस्वान्तता।

अधिलोक अव्य० लोके विभ० अव्ययी०। लोके इत्यर्थे।

अधिवक्तृ त्रि० अधि+वच—तृच्। पक्षपातेन वक्तरि। "विश्वाहेन्द्रो अधिवक्ता" इति ऋ० १,१००,१०, "अधिवक्ता पक्षपातेन वचनयुक्त इति भा०। स्त्रियां ङीप्।

अधिवचन न० अधि+वच—ल्युट्। पक्षपातेन कथने। "अधिकवचनं पक्षपातेन वचन"मिति माधवाचार्य्यः।

अधिविक्त त्रि० अध्यारूढं व्यक्तं येन प्रा० व० । अवरोधितवित्त स्त्रीके । "बहुविवाहतोऽधिवित्ता बधूरिति" म० ८२ १,१६, अधिविक्ता [illegible] मा० ।

अधिवाह पु० अधि+वह—घञ् । [illegible] । "अधिवाहेषु [illegible]" इति म० ८।१६,६, "अधिवाहस्य [illegible]" भा० ।

अधिवास पु० अधि+वस निवासे—घञ् । निवासे "धी० [illegible]" गीता । अधि+वास सुरभीकरणे भावे घञ् । गौरवे "[illegible]" भाग "अधिवासस्पृहयेव मारुतः" इति रघु । अधिवासयति देवता अनेन अधि+वस—णिच् करणे घञ् । मङ्गलद्रव्यादिभिर्देवताद्यावाहनार्थं संस्कारे । "अधिवास सरोजमीति" श्रुति [illegible] "[illegible]" [illegible] पूर्वेद्युर्मङ्गलार्थं [illegible] । "[illegible]" [illegible] [illegible] च ।

अधिवासन न० अधिवासयति [illegible] देवता अनेन अधि+वस—णिच् ल्युट् । [illegible] पूर्वक-पूजनादिकर्मभेदे । अधिवास्यते सुरभीक्रियते अधि+वास सुरभीकरणे भावे ल्युट् । गन्धमाल्यादिभिः सुरभीकरणसंस्कारभेदे मद्युक्तादि च "[illegible]" इति । [illegible] । "[illegible]" इति [illegible] । "[illegible] अधिवासनमिति" हरि ।

अधिवासित त्रि० अधि+वास—सुरभीकरणे कर्मणि क्त । सुरभीकृते गन्धमाल्यादिभिः संस्कृते । अधि+वस—णिच् कर्मणि क्त । [illegible] ।

अधिवाहन न० अधि+वह—णिच्—ल्युट् । उपरि प्रापणे वाहने च । [illegible] । [illegible] ।

अधिविकर्त्तन न० अधि+वि+कृत—छेदने ल्युट् । [illegible] "[illegible] अधिविकर्त्तनमिति" म० ८।२१ ।

अधिविद्य अव्य० विद्यायां विभक्त्यर्थे अव्ययी० । [illegible] । "अधिविद्य [illegible] इति" शब्दकल्पद्रुमः ।

अधिविन्ना स्त्री० अधि+विद—लाभे कर्मणि क्त । [illegible] [illegible] यस्याः उपरि विवाहान्तरं कृतं तस्यां स्त्रियाम् "[illegible] नारी [illegible] अधिवेत्तव्या [illegible]" भाग । "अधिविन्नस्त्रियै [illegible]" याज्ञ ।

अधिवेत्तृ पु० अधि+विद—लाभे कर्त्तरि तृच् । विवाहोपरि विवाहान्तरकर्त्तरि ।

अधिविद् अव्य० वेद—विद्या अव्ययी० । वेदविषयमित्यर्थे । अधि+विद—भावे घञ् । विवाहोपरि विवाहान्तरकरणे ।

अधिवेदन न० अधि+विद—लाभे भावे ल्युट् । विवाहोपरि विवाहान्तरकरणे । तत्र निमित्तादि [illegible] । आधिवेदनिकम् [illegible] "अधिविन्नस्त्रियै [illegible] [illegible]" याज्ञ । "[illegible]" [illegible] । [illegible] ।

अधिवेदनीय स्त्री० अधि+विद—लाभे कर्मणि—अनीयर् । [illegible] विवाहान्तरकरणयोग्ये [illegible] । कर्मणि यत् । [illegible] । "[illegible]" इति मनु । [ल्युट् । [illegible] ।

अधिश्रपण न० अधि+श्रा—पाके णिच्—पुक् [illegible] भावे

अधिश्रय पु० अधि+श्रि—भावे अच् । [illegible] पात्रे [illegible] ।

अधिश्रयण न० अधि उपरि [illegible] पात्रं [illegible] भावे ल्युट् । [illegible] । [illegible] ल्युट् ङीप् । [illegible] (चुला) इति (चुला) इति च ख्यातायाम् स्त्री ।

अधिश्रयणीय त्रि० अधिश्रयणाय पाकाय हितम् छ । पाक-साधनपात्रे । [illegible] अधि+श्री—पाके कर्मणि अनीयर् । [illegible] त्रि ।

अधिश्रयितवै अव्य० अधि+श्री—पाके [illegible] ।

[illegible] [illegible] वेद ।

अधिश्री त्रि० अधिका श्रीरस्य । [illegible] "[illegible]" इति [illegible] "[illegible]" रघु ।

अधिषवण न० अधिषूयते सोम अत्र अधि+षु अधिकरणे ल्युट् । सोमाभिषवसाधनफलकादिपात्रे । "[illegible] पाषाणविवरे" इति वेद । भावे ल्युट् । अभिषवे ।

अधिष्ठाता त्रि० अधिष्ठाय तिष्ठति यत् । [illegible] । "[illegible] [illegible]" इति म० १।८९, [illegible] इति भा० ।

अधिष्ठातृ त्रि० अधि+स्था—तृच् षत्वम् । अध्यक्षे, नियमित-कार्य्यविशेषाकरणेन कृताकृतावेक्षके, नियन्तरि च । "आत्मेन्द्रियाद्यधिष्ठातेति" भाषा० । अधिदैवे च । "इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः" इति पुरा० । ते च अधिदेवताशब्दे दर्शिताः सर्वाधिष्ठाता तु परमेश्वर एव तदपि तस्यैवान्तर्यामिब्राह्मणेन दर्शितम् । "तत्सान्निध्या-दधिष्ठातृत्वं मणिवदिति" सांख्यसू० । यथायस्कान्तमणेः सान्निध्यमात्रेण शल्यनिष्कर्षकत्वं न सङ्कल्पादिना तथैवादिपुरुषस्य संयोगमात्रेण प्रकृतेर्महत्तत्त्वरूपेण परिणमनम् । इदमेव च सोपाधिसष्टृत्वमित्यर्थः । तथाचोक्तम् । "निरिच्छे संस्थिते रत्ने यथा लोहः प्रवर्त्तते । सत्ता-मात्रेण देवस्य तथा चैव जगज्जनिः । अत आत्मनि कर्त्तृत्वमकर्त्तृत्वं च संस्थितम् । "निरिच्छत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रतः" इति सां० भा० । स्त्रियां ङीप् ।

अधिष्ठान न० अधि+स्था—ल्युट् । नियमितकार्य्यविशेषाकरणेन सान्निध्यमात्रेण नियमनाय, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च । वेदान्तिनाञ्च अध्यासस्याद्यमधिष्ठानं यथा तथाऽध्यासशब्दे वक्ष्यते । अधिकरणे ल्युट् । पुरे आधारमात्रे, आश्रये च । "तदधिष्ठानाश्रयदेहे तद्वादः इति" सां० सू० । "तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणमृतपञ्चक तस्याश्रये षाट्कौषिके देहे इति भाष्यम्" । करणे ल्युट् । चक्रे, प्रभावे च अक्रोष, प्रभावेण च हि महत्युद्धस्य्यादिसम्भव । अधिष्ठानञ्च नियन्तृस्य यथोक्तं शास्त्रे । "संहतपरार्थत्वात् त्रिगुणादिविपर्य्य-यादधिष्ठानादिति" "इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत् सर्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकञ्चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आत्मेति" सां० कौ० । भावे ल्युट् । सन्निधिमात्रे । "अत्राधिष्ठानं कुर्व्वीति" आचाराहम-मत्र । "भोक्तुरधिष्ठानाद्भोगायतननिर्म्माणमन्यथा पूति-भावप्रसङ्गात्" इति सांख्यसू० "भोक्तुः प्राणस्याधिष्ठानात् व्यापारादेव भोगायतनस्य शरीरस्य निर्म्माणं भवति । अन्यथा प्राणव्यापाराभावे शुक्रशोणितयोः पूतिभावप्रसङ्गात् मृतदेहवदित्यर्थः । तथाच रससञ्चारादिव्यापारविशेषैः प्राणो देहस्य निमित्तकारणं धारकत्वादिति भाव इति भा० । ननु प्राणिनः निर्व्यापारस्याधिष्ठाने प्रयोजनाभाव इति तत्राह । "भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्त्यात्" इति सां० सू० । "देहनिर्म्माणे व्यापाररूपमधिष्ठानं स्वामिनश्चेतनस्यै-कान्त्यात् अपेक्षा नास्ति किन्तु प्राणरूपभृत्यद्वारा यथा राज्ञः पुरनिर्म्माणे इत्यर्थः । तथा च प्राणस्याधिष्ठातृत्व साक्षात् पुरुषस्याधिष्ठातृत्व प्राणसंयोगमात्रेणेति सिद्धम् । कुलालादीनां घटादिनिर्म्माणेष्वप्येवम् । विशेषस्त्वेव तत्र चेतनस्य बुद्ध्यादेरप्युपयोगोऽस्ति बुद्धिपूर्व्वकसृष्टत्वा-दिति । यद्यपि प्राणाधिष्ठानादेव देहनिर्म्माणं तथापि प्राणद्वारा प्राणिसंयोगोऽप्यपेक्ष्यते पुरुषार्थमेव प्राणेन देह-निर्म्माणादित्याशयेन भोक्तुरधिष्ठानादित्युक्तम्" इति भा० । अधिष्ठीयते कर्म्मणि ल्युट् । अधिष्ठिते इन्द्रियमात्रेण नियन्त्रिते । "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठान-मुच्यते" इति गीता ।

अधिष्ठित त्रि० अधि—स्था—कर्म्मणि क्त । अध्युषिते "त्रिलोक्य-इव्वीक्षमधिष्ठित त्वयेति" कुमा० । सन्निधिमात्रेण नियो-जिते "ईश्वराधिष्ठिता सर्वे स्वं स्वं कार्य्यं हि कुर्व्वते इति पुरा० ।

अधिहरि अव्य० हरौ, विभ० अव्ययी० । हरिमधिकृत्येत्यर्थे

अधीकार पु० अधि+कृ—घञ् उपसर्गस्य दीर्घत्वम् । अधि-कारशब्दार्थे "सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" इत्युपपातकगणमाया मनुः । "स्वागत स्वानधीकारा-निति" कुमा० ।

अधीत न० अधि+इङ—भावे क्त । अध्ययने, कर्म्मणि क्त । कृताध्ययने अभ्यस्ते च त्रि० "ईषदीपदनधीतविद्ययेति" कुमा० । "अधीतवेदवेदाङ्गत्वेनेति" वे० भा० ।

अधीति स्त्री अधि+इङ् अध्ययने क्तिन् । अध्ययने "अधी-तिबोधाचरणप्रचारणैरिति" नैष० । अधि+इक—स्मरणे क्तिन् । स्मरणे "न ते पूर्व्वस्य वसो अधीतौ स्तवाम" इति ऋ० २,४,८, "अधीतौ स्मरणे" इति भाष्यम् ।

अधीतिन् त्रि० अधीतमनेन अधीत+इनि । कृताध्ययने । "स गुरुतराङ्गवतीमधीतिमीमिति" कुमा० । एतदन्य-न्तयोगे च कर्म्मणि सप्तमी वेदेऽधीतीत्यादि किन्तु कर्म्मा-विवक्षया प्रथमं भावे एव क्त पश्चात् कर्म्मणा योग कृतपूर्व्वी कटमित्यत्रेव । यथोक्तं हरिणा । "अकर्म्मकत्वे सत्येव क्तान्ते भावाभिधायिनि । पश्चात् क्रियावता कर्त्रा योगो भवति कर्म्मणेति" । विस्तरः मत्कृतसरलायां द्रष्टव्य ।

अधीन त्रि० अधिगतमिनं प्रभुम् अत्या० स० । आयत्ते । चित्ता-धीन इत्यादौ तु चित्ते अधि—इति वाक्ये समासे अध्युत्तर-पदात् ख । "क तु मां त्वदधीनजीवितामिति" कुमा० ।

"दारादीनभिगत्वा चैव विधुरामाश्रम च" इति मनुः ।
"इन्द्रानुमा इतीवैतौ सहधीमा हि विद्य" इति रघ ।

अधीर त्रि न धीरः चैर्यशून्यः न० त० । कातरे "कामकाममर्यादिनम् अधीरमधुपुष्पेति" इत्यादि । चापले, रोमादिप्रवर्त्तिते च । स्त्रियां टाप् मानिकायां च स्त्री । सहसयं मानिकामहे चलायाः

अधीवास अधि+वस आच्छादने करणे घञ् । दीर्घे च आप् दत्ते बहुव्रीहौ दृश्यते । "अधीवासं परिधानोत्तरीयं बीभत्स विविधे" इति भाषा १९,८,११ अधरीय वर्षः कम्बलादिस्वैरेवाधीवासः बहुव्रीहौ इति भट्टभास्करः । "अधीवासेन सम्वारयतेति भाषा २ ६।१९ अत्र दिव्यासनं नाधोऽधोवास" इति भैरवीय ।

अधीश त्रि अधिक ईशः प्रा० त० । सार्वभौमे अधिपती च । "महाधीशा कर्मेषु गुणगुणवत्तिनः केतुः" इति माघ० ।

अधीश्वर त्रि अधिक ईश्वरः प्रा० त० । स्त्रियां ङीप् । राजनि "अधिपस्य वत्समधीश्वरादिति" भग । प्रभौ च ।

अधीष्ट न अधि+इष्ट इष्ट—भावे क्त । सत्कारपूर्वकनियोगे "निमित्तमामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङिति पा "अधीष्टं सत्कारपूर्वकव्यापार इति सि कौ । कर्म णि क्त । सत्कारपूर्वकं नियोजिते त्रि ।

अधुना अव्य अस्मिन् काले इदम्+धुना च । संप्रति अर्थे प्रवृत्तमात्मना निवृत्तमिति कुवा । अधुना अर्थे टयु । आधुनिक इदानीन्तने त्रि । [विशेष ढोष् ।

अधुनातन त्रि अधुना+भवार्थे ट्यु तुट् च । इदानीन्तने

अनुराधा स्त्री० अनुगता राधा विशाखाम् अत्या०स० । सप्तविंशतिधाविभक्तस्य राशिचक्रस्य सप्तदशभागात्मके नक्षत्रभेदे "रेवत्युत्तररोहिणीमृगशिरोमूलानुराधामघेति" ज्योति० । "राधे विशाखे पुष्यमनुराधाज्येष्ठा मघालेमिति" श्रुति । "गिरिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षा । विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहना । भूतशतपक्षवसवो द्वात्रिंशच्चेति तारकामानम् । क्रमशोऽश्विन्यादीनां कालस्ताराप्रमाणेन । नक्षत्रजमुद्वाहे फलमब्देनातारकामिते सदसत् । दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्य "इति वृ० उक्तेस्तस्याः चतुस्तारात्मकत्वम् । अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः । योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राश्च । शक्रो निर्ऋतिस्तोय विश्वे देवा हरिर्वसुर्वरुण । अजपादोऽहिर्बुध्न्य पूषा चेतीश्वरा भानाम्" इति वृहत्संहितोक्तेस्तस्या मित्रदेवताकत्वम् । तस्य च योगतारा "ज्येष्ठाश्रवणमैत्राणां वार्हस्पत्यस्य मध्यमा" इति सूर्यसि० उक्तेर्मध्यमा तारा । तत्र भव अणो लुक् "लुक्तद्धितलुकीति" पा० स्त्रीप्रत्ययस्य लुक् । अनुराधस्तज्जाते त्रि० । नक्षत्रेण युक्त काल इत्यणस्तु लुप् "लुपि युक्तवद्व्यक्तिवचनमिति" पा० अनुराधा अनुराधानक्षत्रयुक्तकाले तत्र सप्तम्यर्थे तृतीयेति भेद । पृ० दीर्घः । अनूराधाप्यत्र ।

अनुरुद्ध–त्रि अनु+रुध–कर्म्मणि क्त । अपेक्षिते ।

अनुरुध् त्रि०अनु+रुध–क्विप् । अनुरोद्धरि अपेक्षके । कर्मणि क्विपि भेदे उपसर्गदीर्घ । अनुरुद्धे । "अचित्पूर्व्वास्वपरा अनूरुद् ऋ० २,५५,५, "अनूरुद् अनुरुद्धमिति" भा० ।

अनुरूप अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी० । रूपस्य सादृश्ये, योग्यतायाञ्च । अर्श आद्यच् । तद्वति त्रि० । "अथानुरूपाभिनिवेशतोषिणेति" कुमा० । "सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत" गीता । द्वादशाहसाध्ये यागे वर्द्धिष्यमाणगताना त्रयाणां तृचानां मध्ये मध्यमे तृचे । "स्तोत्रियानुरूपौ तृचौ भवत इत्यवमत्तूपा भवन्ति तत्र उत्तम पर्य्यास" इति ता०ब्रा० । प्राकृतानां वर्द्धिष्यमाणगताना त्रयाणा तृचाना स्तोत्रिय, अनुरूप, पर्य्यासश्चेति त्रीणि नामानीति भा० ।

अनुरोध पु० अनु+रुध–घञ् । अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च । "मित्रस्यानुरोधेन द्विविध स्मृतमासनमिति" "नानुरोधोऽस्त्यनध्याये" इति च मनु ।

अनुरोधिन् त्रि०अनु+रुध–णिनि । अपेक्षके । स्त्रियां ङीप् । "पतिव्रताना समयानुरोधिनीति" रामा० । [भाषणे ।

अनुलाप पु० अनुवीप्सायां वारंवार लप्यते लप–घञ् । पुन–

अनुलिप्त त्रि० अनु+लिप–क्त । गन्धादिना कृतानुलेपे

"चन्दनागुरुकस्तूरीकुङ्कुमोद्वर्त्तनादिभिः अनुलिप्तो महात्मा हरिरिह प्रभवतीति" इत्य ।

अनुलेप पु॰ अनु+लिप–भावे घञ् । चन्दनादिलेपने । करणे घञ् । अनुलेपसाधने चन्दनादौ ।

अनुलेपक त्रि॰ अनुलिम्पति अनु+लिप–ण्वुल् । चन्दनादिभिः परदेहलेपनकारके । स्त्रियां टाप् । सा च वर्णसङ्करभेदा । अनुलेपिकायाम् स्त्रियां त्रि ।

अनुलेपन न॰ अनु+लिप–भावे ल्युट् । चन्दनादिलेपने "चन्दनेन तथा दद्यादनुलेपनमादितः" इत्य । करणे ल्युट् । अनुलेपसाधने चन्दनादौ द्रव्ये ।

अनुलेपित त्रि॰ अनु+लिप–णिच्–कर्म्मणि क्त । अनुलिप्तीकृते

अनुलेपिन् त्रि॰ अनुलिम्पति अनु+लिप–णिनि । अनुलेपके

अनुलोम पु॰ क्रमागते वर्णादौ अनुक्रमे । क्रमागते । "अनुलोमविलोमाभ्यां साङ्ख्ययोगौ प्रवेशय इति तत्र "अत्र प्रतिलोमाभिर्वेदाद्धमोर्ध्वमिति" इत्यादि अत्र अनुलोम सामान्यम् एव न भा च । अनु क्रमागते यथाक्रमागते च त्रि "वर्णानि क्रमात् वर्णानि अनुलोमतया पाठयन्ती" इति रिपुघ्न अनुलोम वर्ण येन प्रतिलोमं कर्त्तुं त्रि च । अनुक्रमेण च । "अनुलोमेन लोमेषु स्पृशेत् दीपशास्त्र" इति ।

अनुलोमज पु॰ स्त्री अनुलोमेन यथाक्रमेण जातः जन–ड । परिणीतासवर्णादिस्त्रीषु विप्रादिना उत्पादितो ब्राह्मणे जाते मूर्द्धावसिक्तादौ सन्तानवर्णे । अनुलोमजाश्च "विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् । अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा" "वैश्याशूद्र्योस्तु राजन्यात् माहिष्योग्रौ सुतौ स्मृतौ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः" इति च याज्ञ॰ ।

अनुलोमयत् स्त्री अनुलोमं विलोमयतीव यत् अत्र । अनुलोमगामी पूर्वापरक्रमकारी । स्त्रियां ङीप् । "अपेक्ष्यलोमजानाम् प्रतिलोमजा सतीति" गणौ ।

अनुवंश पु॰ वंशे स्थिताश्च वंशाः । यथाक्रमं वंश अनु परिवत्त अत् । तत्तद्वंशजाता वी त्रि ।

अनुवक्र त्रि॰ अनुगतः वक्रतया वक्रं ग्रहवक्रं गच्छति वक्र +गम डः । इत्यवक्रीभावविरोधकत्वादौ । स्त्रियां ङीप् ।

अनुवत्स त्रि॰ अनुगतैव वत्सा । वत्सिनी वत्स समर्थ स्तन्यपा" इति उदाहृत् धनिकार्थम् पादहृतम् "धनिका यथादत्त इति कर्म्मकालपराजयेन धाम-सम्पत्तिरिक्ती भवति ।

अनुवचन न॰ अनुरूपं वचनम् प्रा॰ स॰ । अध्ययनकर्त्तरि "नवैव प्राकृतादीनिदिशति वेदानुवचनेन" इति मिता॰ "वेदानुवचनमिति" च श्रुतिः ।

अनुवत्सर पु॰ अनुरूपो वत्सरो वर्षविशेषः । "सम्वत्सरः परिवत्सर इदावत्सर एव च । अनु-वत्सरश्च पञ्चमस्तु वत्सरः" इत्युक्ते वत्सरे । "संवत्सरं यथा दत्त विज्ञाय च यथाक्रमम् । परिवर्षे तथा दत्त ममापत् त्रिगोचरम् ॥ इदावर्षे च यज्ञार्थं वाक्यमाचार्यपूर्वमेव अनुवर्त्सरके दत्तं एवमन्य यथा-क्रमविधि" विष्णु॰ च इत्य । अनुवत्सरोदक्षीतम् ।

अनुवर्त्तन न॰ अनु+वृत–ल्युट् । अनुगमने अनुसरणे सादृश्ये पूर्वसूत्रस्थपदस्योत्तरत्रोपस्थितौ अनुसरणे च ।

अनुवर्त्तिन् त्रि॰ अनु+वृत–णिनि । अनुगामिनि अनुयायिनि च स्त्रियां ङीप् । "अमोघा यथा कर्त्तुं यथार्थमनुवर्त्तिनी" इति रामा ।

अनुवाक पु॰ अनूच्यते अनु+वच–घञ् कुत्वम् । वाक्यस्य अभिधेये ऋग्यजुःसमूहे वेदस्य भागे भेदे । "अभिनिधायोऽनुवाकस्य शाखायाम् वर्णेति" भाग॰ ११ ९.२६ "अनुवाकानुवाकस्य प्रवचनं शान्तिरिति" बेदादीप । "अनुवाकोऽष्टमस्योर्द्धे" वा सिद्धान्त-शेखर पाद वचन वा वच । वेदो विभागो वा अनुवाको वा ।

अनुवाक्या स्त्री अनु+वच–ण्यत् टाप् । ऋत्विग्भेदः प्रयाजाया अनुवाक्याया देवताह्वानार्थे ऋचि । "पुरोऽनुवाक्या याज्या इति मनु" "ये ऋचो यज्ञकाले याज्यायाम् अनुवाक्या इत्यादि वाक्योऽपि बेदादीप । "पुरोऽनुवाक्या याज्या च यजति इत्यत्र । पुरोऽनुवाक्या प्राक्प्रयोगकाले या ऋचः सा च पुरोऽनुवाक्योच्यते इति वा ।

अनुवाच् पु॰ अनुवाचयति अनु+वच णिच्–क्विप् । अनु-वाचके अध्यापके ।

अनुवासन न॰ अनु+वस–णिच्–ल्युट् । सुवासने । धूपनो-जनक वस्तुन च । अनुवासनीय सुवासनी त्रि ।

अनुवात पु॰ अनुगतो वात । शिष्यादिदेशात् गुर्वादिदेश-गामिनि वायौ "दक्षिणोऽनुवातः च नासीत गुरवः कीर्त्ति" मनु ।

अनुवाद पु॰ अनु+वद घञ् । विदितस्य शास्त्रार्थस्य कथने यथा अभिधेयोक्तं कर्त्तव्यमिति वाक्येन ज्ञातस्य तदेव

दध्ना जुहोतीति वाक्येन पुनरनुवादेन दधिकरणकत्व-मात्र तत्र विधेयम्। तत्र होमस्यानुवाद एवमन्यत्राप्यूह्यम् अनुवाद पूर्व्वस्येति का०४,१,१८, "य इष्ट्यो त्यनेन वाक्येन पौर्णमास्याममावस्याया वा विहितीनामनुष्ठानमुच्यते तच्च प्रशंसित प्र प्रमेव च्यत कारणात् य इष्ट्येत्यनुवाद इति तद्भा०। अनुवादस्र त्रिविध भूतार्थानुवाद स्तुत्यर्थानुवाद गुणानुवादश्चेति। तत्र सदेव सौम्येदमग्र आसीदित्यादौ भूता-र्थानुवाद । "वायुर्वै क्षेपिष्ठा देवतेत्यादौ, स्तुत्यर्थानुवाद । वायव्य श्वेत छागमालभेतेत्यादौ प्राप्ताया वायुदेवताया स्तुत्यर्थत्वात् तस्य स्तुत्यर्थानुवादत्वम्। अग्निहोत्र जुहोतीति माप्तस्याग्निहोत्रहोमस्य गुणविधानार्थ मवृत्त दध्ना जुहो-तीत्यादि गुणानुवाद । एवमन्यान्यप्युदाहार्याणि। अनु-गुणकथने । "क उत्तम श्लोकगुणानुवादात् पुमान् विर-ज्येत विना पशुघ्नादिति" भाग०"सिद्धोपदेशे च "अनुवादे चरणानामिति" पा० । "सिद्धोपदेशे" इति सि०कौ०।

अनुवादक त्रि० अनुवदति अनु+वद—ण्वुल्। अनुवादकारके अनुवदनशीले च ।

अनुवादिन् त्रि० अनुवदति अनु+वद—णिनि । अनुवादका-रके, अनुवदनशीले, युक्तगीतानुवादिनि च स्त्रियां ङीप् ।

अनुवाद्य त्रि० अनु+वद—ण्यत् । उद्देश्ये प्राप्तावपि किञ्चि-द्विधानार्थमनुकीर्त्तनीये। "अनुवाद्यमनुक्त्वैव न विधेयमुदी-रयेदिति वृद्धा तथा च। पर्वतो वह्निमानित्येव प्रयोक्तव्य । वैपरीत्येन, तथा प्रयोगे तु आलङ्कारिकै वाक्यगतविधेया विमर्शदोषो भवतीति प्रतिपादितम् यथा "न्यक्कारो ह्यय मेव मे यदरय " इति वाक्ये अयमेव न्यक्कार इति प्रयोक्तव्ये तद्वैपरीत्येन प्रयोगात्तथात्वम् । अतएव "वृद्धिरादैच्" इति पा० सूत्रे आदैच् वृद्धिसंज्ञ स्यादित्यर्थके वृद्धेर्विधेय-त्वेन पूर्व्वनिर्देशावश्यम्भावेऽपि वृद्धिशब्दस्य मङ्गलार्थत्वेन प्राक्प्रयोगो भाष्यादौ समर्थित यथा "पूर्व्वोच्चारित" संज्ञी परोच्चारित संज्ञेत्याश्रित्य "एतदेकमाचार्य्यस्य मङ्गलार्थ मृष्यताम्। माङ्गलिक आचार्य्यो महत शास्त्रौघस्य मङ्गलार्थ वृद्धिशब्दमादित प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युरित्यनेन" । "माङ्गलिको मङ्गल-प्रयोजन । महतोऽर्थत एकैक सूत्र शास्त्रमिति शास्त्रौ-घस्येत्युक्तम् । मङ्गलादीनीत्यादिना सप्रयोजन श्रोत्र-प्रयोजनमप्युक्तम्। प्रथन्ते विस्तृतानि भवन्ति तेन समाप्ति-रधिकृतेति भा०उद्यो० ।

अनुवासन न० अनु+वास—सौरभ्ये ल्युट् । धूपादिभि सुर-भीकरणे, वैद्योक्ते स्नेहाद्यै वस्तिकर्म्मणि च । "द्विधा वस्ति परिज्ञेयो निरूहश्चानुवासनम् । कषायाद्यैर्निरूह स्यात् स्नेहाद्यैरनुवासनम्" इति वैद्यकम् । अनुवसति, अनुवासर दीयते वा इ०। सुश्रुतोक्ते अनुवासनद्रव्ये पु०। तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवा-सन पादावकृष्ट । अनुवसन्नपि न दुष्यत्यनुदिवस वा दीयत इत्यनुवासन । तस्यापि विकल्पोऽर्द्धमात्राव-कृष्टोऽपरिहार्य्यो मात्रावस्तिरिति" । "निरूह शोधनो लेखो स्नेहनो बृंहणो मत । निरूहशोधितान् मार्गान् सम्यक् स्नेहोऽनुगच्छति । अपेतसर्वदोषासु नाडीष्विव वह्न्यज्जलम् । सर्वदोषहरश्चासौ शरीरस्य च जीवन । तस्माद्धि शुद्धदेहस्य स्नेहवस्तिर्विधीयत" इति । "तत्रो-न्मादभयशोकापिपासारोचकाजीर्णापमाढ्य रोगश्रममदमूर्च्छा च्छर्दि-कुष्ठ-मेहोदर-स्थौल्यश्वासकासकण्ठशोषशोफोपसृष्ट-क्षतक्षीणचतुर्स्त्रिमासगर्भिणी दुर्बलाग्न्यतृष्णा बालवृद्धौ च वातरोगाहते क्षीणा नानुवास्या नास्थापयितव्या उदरी च प्रमेही च कुष्ठी स्थूलश्च मानव । असाध्यता विकाराणा स्यादेषामनुवासनात्" इति च सुश्रुतम् । अजादिवस्ति-चर्म्मघमवस्त्रादिनिर्मितेन (पिच्कारीति) प्रसिद्धयन्त्रेण धातुवैषम्यदोषनाशाय लिङ्गद्वारेण योनिद्वारेण वा दीय-मान स्नेहादिद्रव्यमनुवासन इति वैद्यकप्रसिद्धि । अधिक वस्तिकर्म्मशब्दे वक्ष्यते । अनुवासन प्रयोजनमस्य अनुप्रवच० छ । अनुवासनीय अनुवासनहेतौ त्रि० ।

अनुवासित त्रि० अनु—वास—क्त । सुरभीकृते, वस्तिकर्म्मणा चिकित्सिते च ।

अनुवास्य त्रि० अनु+वस—कर्म्मणि यत् । सुरभीकार्य्ये वस्ति-कर्म्मणा चिकित्स्ये च । "अतऊर्ध्व स्थापनीयाश्च मानु-वास्या कथयिष्यामीति" सुश्रुतम् ।

अनुविधायिन् त्रि० अनु+विधत्ते अनु+वि+धा—णिनि । यथाविधायिनि, अनुगते च । "गुणानां तदन्वयव्यति-रेकानुविधायित्वमिति" सा०द० ।

अनुविद्ध त्रि० अनु+व्यध—क्त । सम्पृक्ते । "न सोऽस्ति प्रत्ययो लोके य शब्दानुगमादृते । अनुविद्ध इवार्थो हि सर्व शब्देन भासते' इति वाक्यप० । "कोटानुविद्धरत्ना-दिसाधारण्येन काव्यता । दुष्टेष्वपि मता यत्र रसाद्यनुगम स्फुट' इति सा०द० । [वावन्त्यावितिं ' भा०भी०प० ।

अनुविन्ध्य पु० अवन्तिदेशीये नृपभेदे "विन्ध्यानुविन्ध्या-

अनुवृत् त्रि० अनु पश्चात् वर्त्तते अनु+वृत–क्विप्। यथा दर्शितं यथाक्रममिति अनुवर्त्ती च "अनुवृदनुवर्त्तनी" इति भा० भा०।

अनुवृत्त त्रि० अनु+वृत–क्त। अनुगते पूर्वप्रकाशितशब्दसमाने [illegible] अनुवृत्तेव [illegible] [illegible] सर्वकाकारे। अनुवृत्तो [illegible] च। [illegible] त्रि०।

अनुवृत्ति स्त्री० अनु+वृत–क्तिन्। अनुसरणे [illegible] पूर्वप्रकाशितशब्दसमाने [illegible] च। "[illegible] [illegible] [illegible] [illegible] [illegible]" भाष्य०। "अनुवृत्ति [illegible]" [illegible]। "[illegible]" [illegible] [illegible] [illegible] च। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। "[illegible]" [illegible]। "[illegible]" [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] "[illegible] [illegible]" [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]।

अनुवेध पु० अनु+विध–घञ्। वेधे। "[illegible] [illegible] [illegible]" इति भा० द०।

अनुवेल न० वेलायां वेलायाम्। प्रतिवेलं अनुक्षणे "[illegible] [illegible]" [illegible]। [illegible] [illegible] [illegible]। [illegible] त्रि०।

अनुवेल्लित न० अनु+वेल्ल–क्त। [illegible]। "[illegible]" [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible]। [illegible] [illegible] [illegible] इति [illegible]।

अनुवेश पु० अनु+विश–घञ्। [illegible] [illegible] "[illegible] [illegible]" इति [illegible]।

अनुवेश्म त्रि० अनुगतं वेश्म [illegible]। [illegible] [illegible]। "[illegible] [illegible] [illegible]" इति [illegible]। "[illegible]" [illegible]।

अनुव्य त्रि० [illegible] अनु+व्ये–क। [illegible] [illegible] [illegible] [illegible] भा० [illegible] [illegible] [illegible] [illegible] "[illegible]" [illegible]।

अनुव्याख्यान न० अन्वर्थं व्याख्यानम् प्रा० स०। [illegible] [illegible] [illegible]। [illegible] च।

अनुव्याहार पु० अनु+वि+आ+हृ–घञ्। [illegible] [illegible]।

अनुव्रजन न० अनु+व्रज+भावे ल्युट्। [illegible] [illegible] [illegible] [illegible] [illegible] "[illegible] [illegible] [illegible] [illegible] [illegible]"। [illegible] [illegible]।

अनुव्रज्या स्त्री० अनु+व्रज–क्यप्। [illegible] [illegible]। "[illegible] [illegible]। [illegible] [illegible] [illegible]" [illegible]।

अनुव्रत त्रि० अनुगतं व्रतं यस्य बहु०। [illegible] [illegible] [illegible] ३।९,६, [illegible] [illegible] इति भा०। [illegible] [illegible] [illegible]।

अनुशतिकादि पु० [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible]। [illegible] [illegible] [illegible] [illegible]।

अनुशय पु० अनु+शीङ्–अच्। [illegible] [illegible] [illegible] च। अनुशय [illegible] [illegible] [illegible] [illegible] त्रि०। [illegible] [illegible]। "[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible]"। [illegible] [illegible] [illegible] [illegible] [illegible]। "[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible]"। [illegible] [illegible] [illegible]। "[illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]"। [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible]। "[illegible]

पञ्चसप्ताहमासत्र्यहार्द्धमासिकम्। बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्”। बीजं ब्रीह्यादिबीजम्। अयो लौहम्। वाह्यो बलीवर्दादि। रत्नं मुक्ताप्रवालादि। स्त्री दासी। दोह्यं महिष्यादि। पुमान् दासः। एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः। परीक्ष्यमाणे च बीजादौ यद्यसम्यग्बुद्ध्याऽनुशयो भवति तदा दशाहाद्यभ्यन्तर एव क्रयनिवृत्तिः। न पुनरूर्द्ध्वमित्युपदेशप्रयोजनम्। यत्तु मनुवचनम्। “क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत्। सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वेति”। तदुक्तलोहादिव्यतिरिक्तोपभोगादिविनश्वरवस्त्रचेलयानशयनासनादिविषयम्। सर्वञ्चैतदपरीक्षितक्रीतविषयम्। यत् पुनः परीक्षितं पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं तद्विक्रेत्रे न प्रत्यर्पणीयम् तदुक्तम्। “क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति” मिता०। तच्च क्रीतस्य, विक्रीतस्य, अन्यथा वा कृतस्य वस्तुनः, असमीचीनत्वबुद्ध्या यः पश्चात्तापः सोऽनुशय इति बोध्यम्। “भुक्तकर्मणोऽवशेषे च “कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्चेति” शा० सू० स्वर्गार्थकर्मणो भुक्तफलस्यावशेषं कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथा हि स्नेहभाण्डं रिच्यमानं न सर्वात्मना रिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपीति” भा०। “तत्र दृष्टं प्रत्यक्षं श्रुतिः सा हि सानुशयानामेवावरोहं दर्शयति यथा “तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं चाण्डालयोनिं वेति”। चरणशब्देनानुशय (शेष) सूच्यते। इष्टादि जन्मनैव प्राग्भुक्तस्योपभोग शक्तिमत्त्वाभावे आकस्मिकत्वासम्भवात् अनुशयसद्भाव सूचयति अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुकत्वसामान्यतः शास्त्रेणावगमितत्वादिति च शा०भा०।

अनुशयाना स्त्री अनु+शीङ्—शानच्। परकीयनायिकाभेदे। तद्विवरणं नायिकाशब्दे दृश्यम्। अनुतापकर्त्तरि त्रि०।

अनुशयिन् पु० अनु+शीङ्—इनि। यावत्कर्मक्षयं चन्द्रलोके स्थित्वा सावशेषे एव कर्म्मणि पश्चात्तापान्वितया भूमिलोके जन्मग्रहणायागन्तुं प्रवृत्ते जीवे।“यो यो ह्यत्र समन्ति नैर्यायिभिः तदयेन भावितत्वात् सम्पततत्वाच्च संश्लिष्ट-रेत सिगिति” छा०भा०। तस्य रेत सिगाकृत्या पूर्व्व-सम्भूतत्वात् तद्रूपेण गर्भाशयमनुप्रविष्टोऽनुशयी रेत सिगाकृतिर्भवतीति आनन्द०। पश्चात्तापयुते त्रि०। गुणरूप अनुशयत एव भुक्तभोगाया प्रकृतेस्त्याग स्मृतावप्युक्तः। “अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति “य सपद्य जहात्यजामनुशयी सुप्तकुलाय यथेति” भाग०।

अनुशयी स्त्री अनुशय्यते पश्चात्तप्यतेऽस्याम्। अनु+शीङ्—अधिकरणे अच् गौरा० ङीष्। पादरोगभेदे, “हरेदनुशयी वैद्यः क्रियया श्लेष्मविद्रधेरिति” भावप्रकाश।

अनुशर पु० अनुशृणाति अनु+शॄ—कर्त्तरि—अच्। राक्षसे।

अनुशासन न० अनुशिष्यते याथार्थ्येन निरूप्यते अनु+शास—भावे ल्युट्। याथार्थ्यज्ञापने, निरूपणे, कर्त्तव्योपदेशे च। “द्वये देवे प्रतिघाते पञ्चक शतमर्हति। अपकृते तद्द्विगुणं तन्मनोरनुशासनमिति” मनुः अनुशासनविरोधादिति इदा। करणे ल्युट्। तत्प्रतिपादके शास्त्रे यथा ‘अथ शब्दानुशासनम्”। ‘अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य बोध्यन्तेऽनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भाष्यप्रदीपोद्द्योत। “अथशब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति भाष्यम्”। “अथ योगानुशासनमिति” पातञ्जलसूत्रम् योगोऽनुशिष्यतेऽनेन तादृशं शास्त्रमधिकृतमिति तदर्थः अनयत्र अथशब्दस्याधिकारार्थत्वात्तथात्वम् “नामलिङ्गानुशासनमित्यमर” अनुशासन सभामनुपद प्रयोजनमस्य ठक् आनुशासनिकम्। महाभारतान्तर्गतानुशासनपर्व्वणि।

अनुशासित त्रि० अनुशास्ति याथार्थ्येन कर्त्तव्यमुपदिशति अनु+शास—तृच्। कर्त्तव्योपदेशके। स्त्रियां ङीप्। औणा०तृन्। अनुशास्तापि तत्रार्थे त्रि० स्त्रियां ङीप्।

अनुशासिन् त्रि० अनु+शास—णिनि। कर्त्तव्योपदेशके दण्डयितरि च ‘यस्ते मानुशासी राजेति” त्रिक०।

अनुशिष्ट त्रि० अनु+शास—कर्म्मणि क्त। कृतानुशासने, यस्य हितोपदेशः क्रियते तस्मिन्, दण्डिते च।

अनुशीत अव्य० शीते विभ० अव्ययी०। शीते इत्यर्थे, पार-सुखा० भवादौ अत्र। आनुशीत्यः तद्भवादौ त्रि०।

अनुशीलन न० अनुक्षणं शीलनं प्रा०स०। सतताभ्यासे अनवरताचरणे “आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमेति” भक्तिरसा० कृष्णस्य तद्गुणकीर्त्तनस्यानुशीलनं तदर्थः

अनुयोग पु० अनु+युज घञ् । [illegible]

अनुयोजन न० अनु+युज-ल्युट् । [illegible]

अनुयोजनीय त्रि० [illegible]

अनुयो(यु)जित न० अनु+युज-भावे क्त [illegible]

अनुयोक्तृ [illegible]

अनुरक्त त्रि० अनु+रञ्ज-क्त । [illegible]

अनुराग पु० अनु+रञ्ज-घञ् । [illegible]

अनुरोधिन् त्रि० [illegible]

[illegible]

अनुरोध पु० अनु+रुध-घञ् । [illegible]

अनुविद्ध त्रि० अनु+विध-क्त । [illegible]

अनुवेधन न० अनु+विध-ल्युट् । [illegible]

अनुभूति स्त्री० अनु+भू-क्तिन् । [illegible]

अनुसूयागर्भा [illegible]

अनुपद्ध [illegible]

अनुशुष [illegible]

तृतीयमनुष्टुभमिति" च कात्या० सर्वानुक्र० "शुचिमनु-ष्णिहा माध्यमनुष्टुभेति" यजु० ।

अनुष्ठ त्रि० अनुक्रमेण तिष्ठति अनु+स्था—क षत्वम् । अनु-क्रमेण स्थातरि "स्थिता विश्वा अनुष्ठा प्रवणेषु जिघ्नते इति ऋ० १,५४,१०, अनुष्ठा अनुक्रमेण तिष्ठन्तीरिति भाष्यम् । भावे अङ टाप् । अनुष्ठाने स्त्री ।

अनुष्ठातृ त्रि० अनु+स्था—तृच् स्त्रियां ङीप् । विधानकर्त्तरि "नाकृतेप्सितं फलमनुष्ठातरीति" न्यायवाक्यम् ।

अनुष्ठान न० अनु+स्था—भावे ल्युट् षत्वम् । विहितकर्मा-दिकरणे । धर्मलक्षणादिकमभिधाय "एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् । अस्य नित्यमनुष्ठानं सम्यक् कुर्यादत-न्द्रित" इति मनुराह च "उपरुध्यते तपोऽनुष्ठानम्" शकु० ।

अनुष्ठित त्रि० अनु+स्था—कर्मणि क्त । विधानेन कृते धर्मशास्त्रादौ "धर्मशास्त्रैर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति" भा० व०प० ।

अनुष्ठु अव्य० अनु+स्था—कु । सम्यगित्यर्थे "पार्थिवानामुरून् प्रासार्यद्दधावनुष्ठु इति ऋ० १,९५,२ अनुष्ठु इत्येतद-व्ययं सम्यक्समानार्थं ष्ठु, यथेति भा० ।

अनुष्ठेय त्रि० अनु+स्था—कर्मणि यत् । विधेये । "धर्माभि-र्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति भा०व०प० ।

अनुष्ण त्रि० न उष्णः न०त० । उष्णभिन्ने शीतपदार्थे "अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित्" इति" मनु । न उष्णः विरोधे न०त० । अलसे । अलसो हि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यधर्म्मेषु जड इव भवति दक्षस्तु शीतेऽपि तदगणयित्वा कर्त्तव्य-करणाय अजड इव सन् व्याप्रियते इति तयोरुष्णानु-ष्णता । अत्र कारिणार्थे कनि अनुष्णकोऽपि । उत्पले न० । उष्णभिन्ने शीतले स्पर्शे पु० "अनुष्णाशीतपाकज" इति भाषा० । अनुष्ण स्पर्शश्च पृथिवीसमीरणयोः, तयोरौष्ण्योपलब्धिस्तु तेजःसंयोगविशेषादिति बोध्यम् ।

अनुष्णगु पु० अनुष्णाः शीतला गावः किरणा अस्य । चन्द्रे अनुष्णकिरणादयोऽप्यत्र पु० ।

अनुष्णवल्लिका स्त्री अनुष्णा शीतला वल्लीव इवार्थे कनि टापि अत इत्वम् । नीलदूर्वायाम् ।

अनुसंवत्सर अव्य० संवत्सरे विभक्त्य० वीप्साया वा अव्ययी०। वत्सरे इत्यर्थे प्रतिवर्षे च । तत्र भवादौ ठञ् अनुशतिका० उभयपदवृद्धिः । आनुसांवत्सरिक प्रतिवर्षभवे त्रि० ।

अनुसंवरण न० अनु+सम्+वृ—ल्युट् । अनुक्रमेण गोपने । अनुसंवरणाय हितम् ठञ् अनुशतिका० द्विपदवृद्धिः । आनुसांवरणिक तद्धितादौ त्रि० ।

अनुसंहित त्रि० अनु+सम्+धा—कर्मणि क्त । कृतानुसन्धाने यस्य शास्त्रार्थमन्वेषणादिकम् क्रियते तस्मिन् । संहितायाः विभ० अव्ययी० । संहितायामित्यर्थे । "अर्चके प्राक्तनु-संहितमिति" ऋग्वेदप्रातिशाख्यम् ।

अनुसन्तति स्त्री अनुक्रमेण सन्ततिः । अविच्छेदधारायाम "अनुसन्ततिपातिनः पटल्वमिति" माघ ।

अनुसन्धान न० अनु+सम्+धाञ्—ल्युट् । अन्वेषणे चिन्तने च ।

अनुसन्धेय त्रि० अनु+सम्+धा कर्मणि अर्हाद्यर्थे वा यत् । अनुसन्धातुं योग्ये, अनुसन्धातव्ये च ।

अनुसर त्रि० अनुसरति पश्चाद् गच्छति । अनु+सृ—ट स्त्रियां ङीप् । अनुचरे सहगन्तरि च ।

अनुसरण न० अनु+सृ—ल्युट् । अनुगमने, सदृशीकरणे च ।

अनुसवन अव्य० सवनस्य पश्चात् अव्ययी० । सवनस्य (स्नानस्य) पश्चात् सवने, "अनुसवनमनेनमातभेरन्विति का० २५,१२, २६, एन ज्वराद्यभिभूतं दीक्षितं सर्व्वे ऋत्विजः स्वमान्तेषु स्नुयेयुरिति तद्व्याख्या ।

अनुसाय अव्य० साये विभ० अव्ययी० । सायाह्न इत्यर्थे तत्रभव पारिमुखा० ञ्य । आनुसाय्य तत्रभवे त्रि० ।

अनुसार पु० अनु+सृ—घञ् । अनुसरणे, "धर्मशास्त्रानु-सारेण क्रोधलोभविवर्जित" इति दा० स्मृतिः । "शास्त्रानु-सारादधिका व्यापारक्रिया न सिध्यतीति" मनु ।

अनुसारणा स्त्री अनु+सृ+णिच्-युच् सारणा अनगत्य सारणा चालना । अनुधावने, अपसारणायाम्, भीतिहेतोरनुधावने हि भीतस्य चालना भवतीति तस्य सरणाद्धेतुत्वम् "तस्मात् पलायमानानां कुर्य्यान्नात्यनुसारणम्" आ० शा०प० ।

अनुसारिन् त्रि० अनुसरति पश्चाद् गच्छति अनु+सृ—णिनि । अनुगन्तरि । "कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके । मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनमिति शकु० । "यदा यदा सतां हानिर्वेदमार्गानुसारिणामिति" पुरा० ।

अनुसूया स्त्री अनुसूयते अनु+सू—क्यप् । शकुन्तलासहचरी-भेदे शकु० । अनुसूयेत्येके ।

अनुसृति स्त्री अनु+सृ—क्तिन् । अनुसरणे । अनुसरति कुला-न्तरं सर्व्वान् पश्चाद्या क्विप् । कलटायां स्त्रियां, स्त्री । तस्या अपत्य मतान्तरे कल्याण्यादि० ढक् इनङ् च । आनुसृतिनेय तदपत्ये पुं०स्त्री० ।

अनुसृष्टि स्त्री अनु+सृज—क्तिन् । अनुसर्जने । कर्त्तरि सप्तम्या

[illegible] । [illegible] स्त्री । [illegible] । [illegible]

अनुवेधिन् त्रि अनु+विध–णिनि [illegible] । "[illegible]" [illegible] ।

अनुसरण त्रि अनु+सृ–ल्युट् [illegible] । "[illegible]" [illegible] । [illegible] । "[illegible]" [illegible] । [illegible]

अनुसृति स्त्री अनु+सृ–क्तिन् । [illegible] "[illegible]" [illegible] ।

अनुस्यूत त्रि अनु+सिव–क्त [illegible] । "[illegible]" [illegible] ।

अनुस्वार पु अनु+स्वृ–घञ् [illegible] । "[illegible]" [illegible] ।

अनुहरण न अनु+हृ–ल्युट् । [illegible] ।

अनुहार पु अनु+हृ–घञ् । [illegible] ।

अनुहार्य त्रि अनु+हृ–ण्यत् । [illegible] ।

अनुहृत त्रि अनु+हृ क्त । [illegible] ।

अनुहोड त्रि [illegible] । [illegible] ।

अनूक पु अनु+उच–[illegible] । [illegible] "[illegible]" [illegible] १८।११७ [illegible] । "[illegible]" [illegible] १६।७२२ [illegible] "[illegible]" [illegible] ।

अनूचान पु अनु+वच–कानच् [illegible] । [illegible] "[illegible]" [illegible] ।

अनूढा स्त्री [illegible] । [illegible] "[illegible]" [illegible] ।

अनूप त्रि अनुगता आपो यत्र [illegible] । "[illegible]" "[illegible]" [illegible] १८।१ २३ ।

अनूरु त्रि अन+ऊरु [illegible] । "[illegible]" [illegible] ।

अनूति स्त्री [illegible] । "[illegible]" [illegible] ६,२८,१ । "[illegible]" [illegible] ।

अनूदित त्रि अनु+वद–क्त । [illegible] ।

अनूद्य अव्य अनु+वद–ल्यप् । [illegible] ।

अनृत त्रि न ऋत [illegible] । [illegible] ।

अनूप त्रि० अनुगता आपो यत्र ७ब० अच्समा० अतउत्वम् । जलप्राये स्थाने । "शकट शाकिनी गावो जालमसन्दन धनम् । अनूप पयसो राजा दुर्भिक्षे न च एत्तय" इति आह्नि० त० छागलेय । तत्स्थे सर्व्वदावासिनि महिषे पु० । "नद्यम्बुवंशच्छन्नस्य यातलं प्रमयान्वित । देशो-ऽनूप इति ख्यात" इत्युक्ते "अनूपसर" इति प्रसिद्धे देशभेदे पु० । "अनूपराजस्य गुणैरनूनामिति" रघु ।

अनूपज न० अनूपे जलप्राये देशे जायते जन–ड ७त० । (आदा) इति ख्याते आर्द्रके, तस्य जलप्रायोद्भवत्वात्तथा-त्वम् । तत्स्थानजातमात्रे त्रि० ।

अनूप्य त्रि० अनूपदेशे भव यत् । अनुगतजलदेशभवे "यस्य आपो धन्वन्या यस्य सन्त्वनूप्या" इति स्नानमन्त्र ।

अनूबन्ध्य त्रि० अनु+बन्ध–ण्यत् उप० दीर्घ । बधाय बन्ध-नीये यज्ञिये पशौ, "पयामनूबन्ध्यामालभेत" इति शत० २,४,४,१४, "अनुबन्ध्यवेदीति" आश्व० । [याजार्थे ।

अनूयाज पु० अनु+यज घञ् उपसर्गस्य वा दीर्घ । अनु-

अनूरु पु० न स्त ऊरू अस्य ब० । सूर्य्यसारथौ विनताजे सुते अरुणे । तस्य अपूर्ण एव गर्भे मात्रा अण्डस्य स्फोट-नादूरुप्रभृत्यङ्गशून्यकत्वम् तत्कथा भा०आ०दि० । यथा "तत पुत्रार्थिनी देवी व्रीडिता च तपस्विनी । अण्डं बिभेद विनता तत्र पुत्रमपश्यत । पूर्व्वार्द्धकायसम्पन्न-मितरेणाप्रकाशता । स पुत्र क्रोधसंरब्धः शशापैनामिति श्रुति । योऽहमेवं कृतो मातस्त्वया लोभपरीतया । शरीरेणासमग्रोऽद्य तस्माद्दासी भविष्यसि । पञ्चवर्षशतान्यस्या यया विस्पर्द्धसे सह । एष च त्वां सुतो मातर्द्दासीत्वान्मोचयिष्यति । यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात् । न करिष्यस्यनङ्गं वा व्यङ्गं वापि यशस्विनम् । प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया । विशिष्टं बलमीप्सन्त्या पञ्चवर्षशतात्परः । एवं शप्त्वा तत पुत्रो विनतामन्तरीक्षग । अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा । आदित्यरथमध्यास्ते सारथ्यं समकल्पयदिति" । "गत तिरश्चीनमनूरुसारथेरिति" माघ । [तत्कथाऽनुपदउक्ता ।

अनूरुसारथि पु० अनूरु सारथिः रथनियन्ता यस्य । सूर्य्ये

अनूराध त्रि० अनु+राध–घञ् उपस०दी० । अनुराधनीये "इन्द्र वयमनूराध हवामहे" इति अथ० १९,१५,२ ।

अनृच पु० नास्ति ऋगध्ययनतया ऋक् यस्य अच् समासान्त । ऋक्शून्ये अनुपनीते बालके । "नाऽन्यत्र कृत्वापावध्येतर्थ्ये वेति" सि०कौ० । "यथा षण्ढोऽफल स्त्रीषु यथा गौर्गवि चाफला । यथा चाज्ञेऽफलं दान तथा विप्रोऽनृचो-ऽफल" मनु । "अनृचश्च अनधीयान इति" कुल्लू० । "अनृचो माणवक इति" मुग्धबोधम् । समासान्तविधेर-नित्यत्वात् क्वचित् न अच् । "तेन यज्ञं हि सहस्राणा-मनृचां यत्र भुञ्जते इति" "तथानृचे हविर्दत्त्वा न दाता लभते फलमिति" च मनु । समासान्तपक्षे अनृचे इति विषयसप्तमी, तदभावपक्षे चतुर्थीति भेद । अध्येतरी-त्युक्ते "अनृक् सामेति" सि०कौ० । अजभावपक्षे विभा-षया कप् । अनृक्क ऋक्शून्ये त्रि० ।

अनृजु त्रि० न ऋजु । शठे वक्रे कुटिले च । "न पाणिपाद-चपलो न नेत्रचपलोऽनृजु" इति मनु । "या आतुरस्ये-अनृजोर्मृत्यमिति" ऋ० ४,३,१२ । "तस्मात् पापाख्य-त्वनृजू व्ययार्थस्थौ यदा तदा । कर्त्तरी नाम सा ज्ञेया कलहदारिद्र्यशोकदेति" मुहूर्त्तचि० । ऋजुमार्गगामी पूर्व्व-गति, अनृजु वक्री पश्चाद्गतिरिति तदर्थ ।

अनृण त्रि० न ऋण यस्य । ऋणशून्ये । ऋणञ्च व्यवहारदेय-तया उत्तमर्णाय दातव्यत्वेन स्वीकृत धनम् । तच्चावश्य शोध्य तदशोधने "ऋणानामनपक्रियेत्युक्तेरुपपातक भवति । अवश्यशोध्यत्वेन तत्सदृशम् वेदाध्ययनादिकमपि ऋण-शब्देन व्यवह्रियते "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणै-र्ऋणवा भवति स्वाध्यायेन ऋषिभ्य , यज्ञेन देवेभ्य प्रजया पितृभ्य" इति श्रुति एवञ्च वेदाध्ययनादिना ऋण्यात्रेणा-ऋणशोधने अनृणो भवतीति ऋत्वादौ प्रसिद्धम् । एवञ्च "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति" ऋण-शून्यस्यैव मोक्षाधिकारः । अतएव मनुना "दशलक्षणक धर्म्म-मनुतिष्ठन् समाहित । वेदान्त विधिवच्छ्रुत्वा सन्यसेद-नृणो द्विज" इति अनृणस्यैव सन्यासोऽभिहित । "ज्येष्ठेन जातमात्रेण पुत्री भवति मानव । पितृणामनृणश्चैव स तस्मात् सर्व्वमर्हतीति" मनु । "एष वा अनृण य पुत्रीति" श्रुति । कृतोपकारस्य प्रत्युपकारोऽपि ऋणत्वेन स्वीक्रि-यते । तदभिप्रायेणैव "प्रापौष्टिगरथनेमीतेरनृण कराटवर्त्तिभि रिति" रघौ वर्णितम् ।

अनृणिन् त्रि० न ऋणी स्त्रियां ङीप् । ऋणिभिन्ने "दिवस्या-ष्टमे भागे शाकं पचति यो नर । अनृणी चाप्रवासी च स वारिचर ! मोदते, इति भा०व०प० । "एकमप्यक्षर यस्तु गुरु शिष्ये निवेदयेत् । पृथिव्यां नास्ति तद्द्रव्य यद्दत्त्वा सोऽनृणी भवेदिति" पु० ।

अनृत न० न ऋतम् । सत्यभिन्ने मिथ्याभूते । "यद्वाहमभिदु-द्रोह यद्वा शेप उतानृतमिति" ऋ० १,२३,२२ । "प्रियस्य

[illegible]

च्छेदगमे तु ताभ्यस्तदन्यवर्णोन्मितय प्रसाध्या । अन्योन्मितौ कुट्टविधेर्गुणाप्तौ ते भाज्यतद्भाजकवर्णमाने ॥ अन्येऽपि भाज्ये यदि सन्ति वर्णास्तन्मानमिष्ट परिकल्प्य साध्यम् । विलोमकोत्थापनतोऽन्यवर्णमानानि भिन्न यदि मानमेवम् ॥ भूय कार्य्य कुट्टको ऽत्रान्त्यवर्ण तेनोत्थाप्योत्थापयेद्व्यस्तमाभात्" । "इदमनेकवर्णसमीकरण वीज यत्नोदाहरणे द्वित्र्यादयोऽव्यक्तराशयो भवन्ति तेषा यावत्तावदादयो वर्णा मानेषु कल्प्यास्तत्र पूर्व्वाचार्य्यैं कल्पिता यावत्तावत्, कालक, नीलक, पीतक, लोहितक, श्वेतक, चित्रक, कपिलक, पिङ्गलक, धूम्रक, पाटलक, शवलक, श्यामलक, मेचका, इत्यादि । अथ वा कादोन्यक्षराणि अव्यक्ताना सञ्ज्ञा असङ्करार्थं कल्प्या । अत प्राग्वदुद्देशकालापवर्द्धिष कुर्वता गणकेन पक्षौ समौ कार्य्यौ पक्षा वा समा कार्य्या । तत स्वल्पावतारोऽय तयो समयोरनेकत्वात् पक्षादितरपक्षस्याद्य वर्णं शोधयेत्तदन्यवर्णान् रूपाणि च इतरपक्षाच्छोधयेत्तत आद्यवर्णशेषेणेतरपक्षे भक्ते भाजकवर्णोन्मिते । बहुषु पक्षेषु ययोर्ययोः साम्यमस्ति तयोरेव कृते सति अन्या उन्मितय स्यु । ततस्तासूत्रन्मितिषु एकवर्णोन्मितयो यद्यनेकधा भवन्ति ततस्तासां मध्ये द्वयोर्द्वयो समी कृतच्छेदगमेनाद्यं वर्णं शोधयेदित्यादिनान्यवर्णोन्मितय स्यु । एव यावत्सम्भवस्ततोऽन्योन्मितौ भाज्यवर्णे योऽङ्क स भाज्यराशि, यो भाजके स भाजक, रूपाणि क्षेप, अत कुट्टकविधिना यो गुण उत्पद्यते तद्भाज्यवर्णमान, या लब्धिस्तद्भाजकवर्णमान, तयोर्मानयोरिष्टभाजकभाज्याविष्टेन वर्णेन गुणितौ क्षेपकौ कल्प्यौ । तत स्वस्वमानेन स्वक्षेपेण पूर्व्ववर्णोन्मितौ वर्णावुत्थाप्य स्वच्छेदेन हरणे यल्लभ्यते तत् पूर्व्ववर्णस्य मानम् । एव विलोमकोत्थापनतोऽन्यवर्णमानानि भवन्ति । यदि तु अन्योन्मितौ द्व्यादयो वर्णा भवन्ति तदा तेषामिष्टानि मानानि कृत्वा स्वस्वमानैस्तानुत्थाप्य रूपेषु प्रक्षिप्य कुट्टक कार्य्य ।अथ यदि विलोमकोत्थापने क्रियमाणे पूर्व्ववर्णोन्मितौ तन्मितिर्भिन्ना लभ्यते तदा कुट्टकविधिना यो गुण उत्पद्यते स क्षेप स भाज्यवर्णनाम तेनान्यवर्णमानेषु त वर्णमुत्थाप्य पूर्व्वोन्मितिषु विलोमकोत्थापनप्रकारेणान्यवर्णमानानि साध्यानि । इह यस्य वर्णस्य यन्मानमागत व्यक्तमव्यक्त, व्यक्ताव्यक्त वा तस्य मानस्य व्यक्ताङ्केन गुणने कृते तद्वर्णाक्षरस्य निरसनमुत्थापनमुच्यते' तद्व्याख्या । उदाहरण तत्रैव दृश्यम् ।

अनेकविध त्रि॰ अनेका विधा प्रकारा यस्य । बहुप्रकारे

"यत्रानेकविधमानन्त्यं तत्र स्यान्मत आनन्त्यं बलीय" इति परि॰ ।

अनेकशस् अव्य॰ अनेक+वीप्सार्थे कारके शस् । अनेकवारार्थे "अनेकशो निर्ज्जितराजकस्त्वमिति" भट्टि ।

अनेकाग्र त्रि॰ न एकाग्र । शून्यहृदये एकाग्रताशून्ये

अनेकान्त त्रि॰ न एकान्तो नियमो अव्यभिचारो यत्र । अनियमे, अनिश्चितफलके च । व्यभिचारवति दुष्टहेतौ पु॰ । "अनेकान्तो विरुद्धश्चाप्यसिद्ध प्रतिपक्षित । कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा॰ । स च त्रिविध "आद्य साधारणस्तु स्यादन्योऽसाधारणो मत । तथैवानुपसंहारी त्रिधाऽनैकान्तिको मत" इति भाषा॰। एकान्तोऽव्ययस्य प्रमाण॰ण । ऐकान्त न॰त॰ अनैकान्तोऽप्यत्र क्वचित् "भाषायाम् अनैकान्तो विरुद्ध श्चेत्येव" पाठ । तथा च साधारणादित्रितयान्यान्यत्वमनेकान्तत्वम् ।

अनेकान्तवादिन् पु॰ अस्ति नास्ति वेत्येकान्तं न वदति वद–णिनि इत॰ । बौद्धभेदे । तस्य अस्तिनास्तिकायवादित्वेन तथात्वं विवरणमर्हच्छब्दे दृश्यम् ।

अनेकार्थ त्रि॰ अनेके अर्था अभिधेया यस्य । नानार्थे शब्दे । यथा गवादय अक्षादयश्च । 'अनेकार्थस्य शब्दस्य सयोगाद्यैर्नियन्त्रिते । एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधा श्रयेति' सा॰द॰। अयमाशय "सयोगश्च विभागश्च साहचर्यं विरोधिता । अर्थ प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधि । सामर्थ्यमौचिती देश कालाद्युक्ति स्वराचक । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव" इति हर्युक्तैरनेकार्थशब्दाना सर्वत्र शक्तौ समानायां सत्या, सयोगाद्यैरितरार्थबोधप्रतिरोधनेन विशेषार्थ एव स्मार्य्यते । तद्भिन्नार्थस्य तु व्यञ्जनया बोध इत्यलङ्कारिकाणा मतम् । तथाच सयोगादय शक्त्या अन्यार्थोपस्थितौ प्रतिबन्धका । व्यञ्जना वृत्त्या तदुपस्थापने तु न । 'अनेकार्थशब्देभ्य सर्वेषामर्थानामविशेषेणोपस्थितौ सत्यामपि संयोगादय अन्यशब्दविषयशाब्दबोधमात्र प्रतिबध्नन्ति न तु व्यञ्जनाविषयमिति' रसगङ्गाधर । नैयायिकादयस्तु अनेकार्थशब्दाना 'क्वचिदाच्छेदकत्वाभावलाभे तत्रैव शक्तिरन्यत्र लक्षणा तत्र सयोगादय अन्यार्थबोधनमेव प्रतिबध्नन्ति । तथा च सयोगादय सति तात्पर्ये, तद्विषयीभूतार्थविषयस्मृति तज्जन्यान्वयबुद्धिं च न प्रतिबध्नन्ति किन्तु तात्पर्यकालोपायका इत्यन्ये व्यञ्जाख्यैर्नाशि लोपमुरिति भेद । अन्ये तु अनेकाना प्रयोजनानि

नत्र वस्तु वा । अनेकप्रयोजनमपि त्रि॰ "अनेकार्थाभि-
धाने च साधुष्वनेकार्थी" इति स्मृतिः । बहु ।
स्त्र्यनेकाने द्रु॰ न॰ त॰ ।

अनेकाश्रित पु॰ अनेकमाश्रित तत् । वैशेषिकमते संयोगादिषु, गुणभेदेषु च । "संयोगश्च विभागश्च संख्या द्वि-त्वादिकास्तथा । द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः" इति भाषा "मिलने सति अनेकवृत्तित्वमाश्रितत्वमिति" मुक्ता । एकत्व एव अनेकानाश्रितत्वेऽप्यनेको-पाधिना । अपि च संयोगादय आश्रया न तथा । एकदेशेनानाश्रितत्वेऽपि तथात्वेऽपि न तत्र तथा-त्वमिति भेदः ।

अनेकशस् अ॰ न एकम् । बहुसंख्याके प्रकारे । "अनेकशो धनवो कार्यश्च" इति स्मृतौ । "बहुभिः प्रकारैः प्रयुक्तिवन्निर्मिते अर्थादा इतरदर्शनमिति" मा । अनेक-शब्दे त्रि॰ क्रियां वीप् ।

अनेडमूक त्रि॰ एडो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् । न॰ त॰ । (काला बोवा) इति ख्याते जनपदभेदे, जडस्वभावे च । [शठे स्वार्थे निरवधारे ।

अनेय त्रि॰ नेतुमशक्यः नञ्‌ त्रि॰ अनेयबुद्धौ न॰ त॰ ।

अनेनस् त्रि॰ नास्ति एनः यस्य । पापशून्ये निष्पापादि
इति "राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः" इति
मनु॰ ८ अध्यायादिषु । "अनेनो धीमतो नाम" इति भा॰ १।१६।७। "अनेनाः पापरहितः यथा भवति" धातव "सनेना भवता दर" इति भा॰ ७,९९,१ । "अनेना भवति" इति भाष्यम् ।

अनेमा पु॰ नी–मनिन् न॰ त॰ । अप्रधाने निरुद्धकार्ये ।

अनेहस् पु॰ न हन्यते हन–असि प्रत्ययेन । काले । स्त्री अनेहा । "अनेहा काले दिष्टोऽप्यनेहापि" अमरः । न हन्यते सर्वं हि यतः । अहिंसनीये त्रि॰ । "अनर्वं मर्त्यानां अनेहर्वमिति" ऋ॰ १।९।६ । "अनेहसं वैना-न्याभिर्वादिति" भा॰ । "अनिमिषत्वम् अनागसं स्तनुहि अनेहसम्" ऋ॰ १।१।९ । "अना मोऽस्ते बहाय विश्व अनेह" ऋ॰ ६।१।१ ।

अनेकाश्रय न॰ एकाश्रयस्य भावः नञ्‌ अभावे न॰ त॰ । एका-श्रयाभावे । न॰ ब॰ । एकाश्रयशून्ये त्रि॰ । "आसन्नाश्र-यैकाश्रयेषु सर्वेष्वप्यनेकाश्रयादिषु" भाष ।

अनेकान्त पु॰ अनेकान्तवादार्थे । तत्र सप्तभङ्गिनया अने-कान्तो स्याद्वादेति" जैना वाचस्पत्यम् ।

अनेकान्तिक पु॰ एकान्तं नियतं व्याप्नोति एकान्त+ठञ् एकान्तो नियतो व्याप्तिमान् तत्‌ कार्ये नञ्‌ न॰ त॰ । अनेकान्तवादार्थे अनेकान्तवादेऽपि दृष्टम् "नियतैक-नियो नय भावा । नैयायिको नियमविरुद्धत्व त्रि॰

अनेकान्त न॰ न ऐकान्तम् अभावे न॰ त॰ । एकान्ताभावे ।

अनेतिस त्रि॰ न एतिस्य यस्य । परम्परावचनरहिते अवधारणे । "अनागतमवेक्ष्य च अर्थसंपत्तिवदिति ?" मा॰ भा॰ व॰ ।

अ(आ)नैपुण न॰ अनिपुणस्य भावः ष्यञ्‌ वा अत्राध्ये वा इति । अनिपुणत्वे । अत्र अ(आ)नैपुण्यमपि न॰ ।

अ(आ)नैश्वर्य न॰ अनीश्वरस्य भावः अत्राध्ये वा इति । अनीश्वरत्वे अनीशत्वे । नास्ति ऐश्वर्यं यस्य । अनैश्वर्ये वैधव्ये त्रि॰ ।

अनो अव्य॰ अन+णी–ओ । अभावार्थे । "अनो भवति महाने नानो भवति अनो धनम् नागोजि मोक्षवाद" । अनो ह च इति भो इति च निरुक्त व्याकरणशिक्षा ।

अनोकह पु॰ अनसः शकटस्य अकं गतिं हन्ति प्रतिरोधं करोति हन–ड ६त॰ । वृक्षे । "इत्थं पूर्वं स्तुवति सुमनो वदान्यदिति अनोकहजनितसुमन्दमीति च" रघु । "क्वचित्प्रकृष्टतमोऽनोकहमाकलयन् इति" माघ ।

अनोदन त्रि॰ नास्ति ओदनः अन्नं यत्र । "मासार्धमनुदन्यां स्त्री । "पञ्च हविषामभवनोदनं वा" इति श्रुतिः ।

अनोहन त्रि॰ न ओहारस्वभाव एव ओहृ+अ–न न॰ त॰ । ओहारोऽहारत्वाभावेन हरौ । "मा प्रभुः प्रभव पुना-रादयन्ते च दर्श्यते । अनन्तभूर्ध्व एव परस्पर विनी-चनि" भट्ट । औचिति औचारे तथा तस्य । अनोक्ते त्रि॰ ।

अन्त्‌ बन्धे भ्वा॰ पर॰ सक॰ सेट्‌ । अन्तति ऐ आन्तित्‌ इ अन्ताथि अन्तते । निबन्धने अन्तो इति वेद "ऋचोहि पूर्वस्याऽन्तो इति श्रुतिः ।

अन्तु सौत्रो बन्धिन् पर॰ इ॰ अन्तम् ।

अन्त्र अ॰ सौत्रो धातुः अन्तये अन्ते न धता अन्तकाले ब्र आदिनु वेद पर । अन्तति । निषि अन्तम् ते निबन्धिन । आन्तीत्‌-आन्तन्‌ । अन्तिता-अन्तता । अन्तितिति–अन्तुति । अ अन्त । निषु अन्ति । अ–अन्ता अन्तिता । नि+अन्ता-न्ते । अन्ति अन्यते "अन्ति कार्यनिवन्धेऽपि चोक्ता-र्थि" भाष । अनु अन्तः । अन्तु अन्तु । अन्तति-इत्यं वाक्यमिति" । नि । अन्तर्यति अन्तु । अन्त-

नम्। "अन्यार्थधीकृत् व्यापृतिरञ्जनम्" का०प्र०। कर्त्तरि ल्यु। व्यञ्जना एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधा-श्रयेति" सा०द०।

अन्त न० अम–तन्। स्वरूपे, समाप्ते च। शेषे पु०न०। नाशे, सीमायां, निश्चये, शेषावयवे च पु०। निकटे, मनोहरे च त्रि०। तत्र स्वरूपे "मृदुलतान्तलतान्तमलोकयदिति" माघ। नाशे "पतत्यविरतं वारि नृत्यन्ति शिखिनो मुदा। "अद्य कान्त कृतान्तो वा दुःखस्यान्तं करिष्यतीति" उद्भट। "वैरस्यान्तं करिष्यति" रामा०। सीमायां "वनान्तपर्य्यन्तमुपेत्य सस्पृहमिति" नैष०। "ओदकान्तात् स्निग्धोऽनुगन्तव्य" इति श्रुति। सीमाऽवधिः स च दैशिकः कालिकश्च। तत्र दैशिक उक्तोदाहरणे कालिकस्तु। "पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवमिति" ज्योति०। "दशाहान्ते पुनः क्रियेति" स्मृति शेषसीमायाम् "अस्तु वनान्ताहनितवक्षारिणमिति" माघ। "दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिन" इति भामिनी०। "गङ्गाप्रपातान्तविरूढशष्पमिति" रघु। शेषावयवे "नेत्रान्तसङ्कोचते" इति वेदान्त इत्यादि। निश्चये। "उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिरिति" गीता। उभयो सदसतोरित्यर्थ। निकटे अन्तपाल। समाप्ते शुद्धान्त। शेषे निशान्त।

अन्तःकरण न० कृ-करणे ल्युट् अन्तरभ्यन्तरस्य करणं, कर्म०, तद्वृत्तिपदार्थानां सुखादीनां करणं ज्ञानसाधनं इत० वा। ज्ञानसुखादिसाधने आभ्यन्तरे मनोबुद्धिचित्तादिपदाभिलप्यमाने इन्द्रिये। तच्चान्तःकरणम् वेदान्तिमते चतुर्विधम्। "मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे" इत्युक्तकार्य्यभेदात्। अन्यत्र व्यक्तमुक्तम् "यदा तु सकलविकल्पकाद्य तदा भवेत्तन्मनः इत्यभिख्यम्। स्याद्बुद्धिसंज्ञं च यदा तु वेत्ति सुनिश्चितं संशयरूपहीनम्। अनुसन्धानरूपं तच्चित्तञ्च परिकीर्त्तितम्। अहङ्कृत्यात्मवृत्त्या तु तदहङ्कारतां गतमिति"। एतदनुसारेणैव शारदायामुक्तम् "अन्तःकरणमात्मन। मनोबुद्धिरहङ्कारश्चित्तञ्चेति प्रकीर्त्तितमिति"। तस्य च ज्ञानादिप्रत्यक्षकरणत्वादन्तःकरणत्वम्। तत्साधकमनुमानञ्चेत्थम् ज्ञानसुखादिप्रत्यक्षं सप्राहकेन्द्रियसापेक्षं प्रत्यक्षत्वात् रूपादिप्रत्यक्षवत्। नच चक्षुरादीनां तत्करणत्वं सम्भवति रूपादिमात्राभावादित्यन्तःकरणसिद्धिरिति नैयायिकादय। साङ्ख्यादयस्तु महत्तत्त्वापरपर्य्यायमेवान्तःकरणमङ्गीचक्रुः। पञ्चतन्मात्रेभ्यो भूतेभ्यश्चाहङ्काररूपद्रव्योत्पत्तिमुक्त्वा 'तेनान्तःकरणस्येति" सा०सू० तत्सिद्धिरुक्ता तदनुमाने च भाष्ये एव प्रयोगादिकं दर्शितम्। "अहङ्कारद्रव्यं निश्चयवृत्तिमद्द्रव्योपादानकं निश्चयकार्यद्रव्यत्वात् यन्नैवं तन्नैवं यथा पुरुषादिरिति। अत्राप्ययं तर्कः, सर्वोऽपि लोकः पदार्थमादौ स्वरूपतो निश्चित्य पश्चादभिमन्यते अयमहं, मयेदं कर्त्तव्यमित्यादिरूपेणेति, तावत् सिद्धमेव। तत्राहङ्कारद्रव्यकारणाकाङ्क्षाया वृत्त्योः कार्यकारणभावेन तदाश्रययोरेव कार्यकारणभावो लाघवात् कल्प्यते कारणस्य वृत्तिलाभेन कार्यवृत्तिलाभस्यौत्सर्गिकत्वादिति। यद्यपि अन्तःकरणमेकं तथापि वक्ष्यमाणवृत्तिभेदमाश्रित्यान्तःकरणत्रये क्रमः, कार्यकारणभावश्चोक्तः योगोपयोगिश्रुतिस्मृतिपरिभाषानुसारादिति मन्तव्यम्। तदुक्तं वाशिष्ठे। "अहमर्थोदयो योऽयं चित्तात्मा वेदनात्मक। एतच्चित्तद्रुमस्यास्य वीजं विद्धि महामते। एतस्मात् प्रथमोद्भिन्नादङ्कुरोऽभिनवाकृति। निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते। अस्य बुद्ध्यभिधानस्य याङ्कुरस्य प्रपीनता। सङ्कल्परूपिणी तस्याश्चित्तचेतोमनोभिधा" इति। अहमर्थोऽन्तःकरणसामान्यम्। अत्र वाक्ये वीजाङ्कुरन्यायेनैकस्यैवान्तःकरणद्रव्यस्य वृत्तिमात्ररूपेण चित्ताद्यवस्थाभेदाः क्रमिकास्त्रिविधाः परिणामा उक्ता इति। साङ्ख्यशास्त्रे च चिन्तनवृत्तिकस्य चित्तस्य बुद्धावेवान्तर्भाव। अहङ्कारस्य चात्र वाक्ये बुद्धावन्तर्भाव "इति। कारिकायामपि "अन्तःकरणं त्रिविधं दशधा वाह्यं त्रयस्य विषयाख्यमिति" त्रैविध्यमुक्त्वा "सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्, तस्मात्त्रिविधं करणं द्वारि, द्वाराणि शेषाणीति" तत्त्रयस्यैव प्राधान्यमुक्तम्। एवञ्च पुरुषस्य सन्निधिमात्रादधिष्ठातृत्वं गौणं मुख्यमधिष्ठातृत्वन्तु अन्तःकरणस्यैव यथोक्तम् "अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम्" सा०सू०। "अन्तःकरणस्यानुपचरितमधिष्ठातृत्वं सङ्कल्पादिद्वारकं प्रत्येतव्यम्। नन्वधिष्ठातृत्वं घटादिवदचेतनस्य न युक्तं तत्राह। लौहवत् तदुज्ज्वलितत्वादिति। अन्तःकरणं हि तप्तलौहवच्चेतनोज्ज्वलितं भवति। अतस्तस्य चेतनायमानतयाधिष्ठातृत्वं घटादिव्यावृत्तमुपपद्यत इत्यर्थ। नन्वेवं चैतन्येनान्तःकरणस्योज्ज्वलने चिते सङ्गित्वमग्निवदेव स्यादिति चेन्न नित्योज्ज्वलचैतन्यसंयोगविशेषमात्रस्य संयोगविशेष,

[illegible] । न तु [illegible] । [illegible] इति हि [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] "[illegible] [illegible] । [illegible] । [illegible] । [illegible] । [illegible] इति [illegible] "[illegible]" [illegible] । [illegible] । [illegible] [illegible] इति [illegible] । [illegible] "[illegible] [illegible] । [illegible] । [illegible] । [illegible] इति ।

धम्मा कुटिल त्रि [illegible] । [illegible] त्रि ।

धम्मा हानि स्त्री [illegible] । (वृद्धि) इति [illegible] त्रि ।

धम्मा कोटर [illegible] । [illegible] ।

धम्मा [illegible] इति ।

धम्मा पङ्गु त्रि [illegible] । [illegible] ११.१३ । [illegible] ।

धम्मा पात त्रि [illegible] । [illegible] । [illegible] ।

धम्मा पातिन् त्रि [illegible] । [illegible] ।

धम्मा पाल त्रि [illegible] "[illegible]" [illegible] ११.६.११ "[illegible]" [illegible] ।

धम्मा पुर न [illegible] । (धम्म) इति [illegible] "[illegible]" [illegible] । [illegible] । "[illegible]" [illegible] । [illegible] ।

धम्मा पुरघर त्रि [illegible] । [illegible] ।

धम्मा पुरसम्राम त्रि [illegible] । [illegible] ।

धम्मा पुराणम त्रि [illegible] । "[illegible] इति । [illegible] इति [illegible] । [illegible] (१) [illegible] । [illegible] । [illegible] । [illegible] (१)। [illegible] (१) [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

दद्याकार खरकृष्णमूर्द्धज गतु,नाशने कुशल । द्विजदेव-
यज्ञयोगप्रसक्तधी स्त्रीजितो मतिमान् ॥ सामोति (५) य
कोऽतिविरूपदेह शयानुगामी खलु दुर्भगश्च । दाता महा-
रम्भसमाप्तकार्यो गुणे शशस्यैव भवेत् समान " इहत्-
संहितोक्तलक्षणादिभेदपञ्चकात् ।

अन्तःपुरिक त्रि० अन्तःपुरे नियुक्त ठक् सद्यापूर्व्वकविधे-
रनित्यत्वान्नवृद्धि । अन्तःपुराध्यक्षे कञ्चुक्यादौ "अस्मत्-
प्रार्थनामन्तःपुरिकाभ्यो निवेदयेति' शकुन्त० ।

अन्तःपुष्प न० अन्तर्गतं पुष्पं स्त्रीरजः । द्वादशवर्षादूर्द्ध्वमभ्य-
न्तरजाते स्त्रीणां रजसि । "वर्षैद्वादशकादूर्द्ध्वं यदि पुष्पं
बहिर्नहि । अन्तःपुष्पं भवत्येव पनसोडुम्बरादिवत्" ।
इति काश्यपसंहिता ।

अन्तःप्रकृति स्त्री अन्तर्वर्त्तिनी प्रकृतिः राज्याङ्गम् । राज्ञां
सन्निकृष्टप्रकृतौ अमात्यादौ । "अन्तःप्रकृतिकोपनं हि
राज्ञां महद्व्यसनमिति" नीति० । [आत्मानुसन्धानपरे ।

अन्तःप्रज्ञ त्रि० अन्तः स्था प्रत्यक्तत्त्वविषयिणी प्रज्ञा यस्य ।

अन्तःप्रविष्ट त्रि० अन्तःकरणे, मध्ये वा प्रविष्टः । हृदय-
गते, अभ्यन्तरगते च । "अन्तःप्रविष्टकर्णपल्लवप्रतिबिम्बे-
नेति" काद० ॥

अन्तःशरीर न० अन्तः स्थूलदेहमध्यस्थं शरीरम् । स्थूल-
देहमध्यवर्त्तिनि वेदान्तमतसिद्धे सूक्ष्मशरीरे । तच्च "पञ्च-
प्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं
सूक्ष्माङ्गं भोगसाधनम्"मित्युक्तं सप्तदशावयवं भोगसाधनं
सूक्ष्ममङ्गम् । शरीरस्य मध्ये अव्ययी० । देहमध्ये
इत्यर्थे अव्य० । अन्तर्देहादयोऽप्युक्तार्थयोः । अन्तरेव
देहः । मनोरूपदेहे न० । [दुःखदायके ।

अन्तःशल्य न० अन्तःकरणस्य शल्यमिव पीड़कत्वात् । मनसो

अन्तःसंज्ञ त्रि० अन्तः अभ्यन्तरवर्त्तिनी कथनायोग्यत्वात् अप्र-
काश्या संज्ञा चेतना यस्य । वृक्षादौ । ते च मनुना
दर्शिता यथा "उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररो-
हिणः । ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ।
अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः । पुष्पिणः
फलिनश्चैव वृक्षास्तूभयतः स्मृताः । गुच्छगुल्मं तु विविधं
तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रतानाः वल्ल्य
एव च । तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना । अन्तः-
संज्ञा भवन्त्येते सुखदुःखसमन्विताः" इति ।

अन्तःसत्त्वा स्त्री अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी सारो वा
यस्याः यस्य वा ६ब० । गर्भिण्यां स्त्रियाम् । अन्तःसारे त्रि० ।

अन्तःसुख त्रि० अन्तरात्मनि तदनुसन्धाने एव सुखं यस्य ।
आत्मानुसन्धानमात्रसुखे बाह्यसुखशून्ये । "योऽन्तः-
सुखोऽन्तरारामः इति" गीता । [मदस्राविणि हस्तिनि ।

अन्तःस्वेद पु० अन्तः स्वेदो मदस्यन्दः मदजलं यस्य ६ब० ।

अन्तक पु० अन्तयति अन्तं करोति अन्त+णिच्—ण्वुल् ।
मृत्यौ "व्याजेनापि कृता राजन् गो दर्शयति सान्तक-
मिति" भार०पु० । देहिनां स्वस्वकर्मानुसारेण विनाशनाय
ईश्वरनियुक्ते यमाख्ये देवभेदे "कामप्रभावान्मयि नान्तको-
ऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः" इति रघु । विनाश-
कमात्रे त्रि० "क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तक-
स्यान्तकोऽहमिति" वेणी० । परमेश्वरे पु० तस्य सर्वभूतानां
प्रलये संहर्त्तृत्वात्तथात्वम्, "महोदधिशयोऽन्तक" इति
विष्णुसह० ।

अन्तकर त्रि० अन्तं नाशं करोति कृ—ट उप०स० । नाश-
कारके । "अहमन्तकरो नूनं ध्वान्तस्येव दिवाकरः" इति
भट्टि । स्त्रियां ङीप् ।

अन्तकरण त्रि० अन्तं करोति नन्द्या० ल्यु । नाशकारके ।
"दूरतं समाश्रयञ्चैव राजा राष्ट्राद्विवासयेत् । राज्यान्त-
करणावेतौ द्वौ दोषौ पृथिवीक्षितामिति" मनु । भावे
ल्युट् । नाशने न० ।

अन्तकर्मन् न० अन्तस्य नाशस्य परिच्छेदस्य वा कर्म्म उत्पाद-
नम् । नाशने । "षो अन्तकर्म्मणि इति 'पा०धातु० । अन्ते-
र्नाशनार्थत्वात् सकर्मकत्वम् तेन "राघव ! स शरैर्घोरैर्घोर
रावणमाहवे" इत्यादौ शास्यस्य कर्म्मता स्येति रूपेर्लोटो
मध्यमैकवचनान्तरूपम् । परिच्छेदकरणे 'अवासासीत्
वैयासकीमित्यादि ।

अन्तकारिन् त्रि० अन्तं करोति कृ—णिनि ६त० । अन्त-
कारके विनाशके । स्त्रियां ङीप् । ण्वुल् । अन्तकारको-
ऽप्युक्तार्थे त्रि० । [ब्रह्म निर्वाणमृच्छतीति" गीता ।

अन्तकाल पु० ६त० । मृत्युकाले, "स्थित्वाऽस्यामन्तकालेऽपि

अन्तकृत् त्रि० अन्तं करोति कृ—क्विप् ६त० । विनाशके ।

अन्तग त्रि० अन्तं गच्छति गम—ड उप०स० । कार्य्यान्त-
गामिनि, निरवशेषकार्य्यकारके, पारगामिनि, च "यत्नेन
भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्य्युं
छन्दोगं च समाप्तिकमिति" मनु । [गामिनि ।

अन्तचर त्रि० अन्ते शेषावधौ चरति चर—ट । कार्य्यादिशेष-

अन्ततस् अव्य० अन्त+सार्वविभक्तिकस्तसि । अन्तेन अन्ते
अन्तादित्याद्यर्थे । तत्र तृतीयार्थे । "वैश्योऽपि मासिता-

[illegible] इति [illegible]। "[illegible] इति वा । [illegible] "[illegible]" इति [illegible] । "[illegible] इति [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

अनताम त्रि [illegible] । [illegible] । [illegible] १।१०।८, "[illegible]" [illegible] । [illegible] ।

अनतपात्र त्रि ह [illegible] । [illegible] । "[illegible]" [illegible] ।

अनताद् [illegible] । [illegible] "[illegible]" इति [illegible] । [illegible] १।११।८ [illegible]" इति [illegible] १।११।८, [illegible]" [illegible] "[illegible]" इति "[illegible]" [illegible] । [illegible] । [illegible] । [illegible] ।

अनतर न [illegible] । [illegible] । [illegible] । "[illegible] १।१ ८, [illegible] "[illegible]" [illegible] १।११।१२ [illegible] "[illegible]" इति" [illegible] १।१९।८ "[illegible]" [illegible] इति ८।१८।१८, [illegible] इति [illegible] । [illegible] । [illegible] । [illegible] (१४) [illegible] । "[illegible] ६।८।० [illegible]

[illegible] वा । "[illegible] [illegible] १।११।१२ "[illegible]" इति वा । [illegible], "[illegible]" [illegible] । "[illegible]" [illegible] । [illegible] "[illegible]" इति [illegible] । [illegible] । "[illegible]" इति [illegible] । [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] । [illegible] । "[illegible]" [illegible] । [illegible] । "[illegible]" [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] "[illegible]" [illegible] । "[illegible]" इति [illegible] । [illegible] । [illegible] "[illegible]" इति [illegible] । [illegible] ।

अनतरथिन् ह [illegible] । [illegible] "[illegible]" इति [illegible]" "[illegible]" इति [illegible] । [illegible] ।

अनतरेज्ञ ह [illegible] । [illegible] "[illegible]" [illegible] । "[illegible]

कुरङ्ग" इति । बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतानि अङ्गानि निमित्तानि यस्य । व्याकरणोक्ते परनित्यबहिरङ्गबाधके नैमित्तिककार्य्यभेदे, तद्बोधकशास्त्रे च । यथा ग्रामणिनी कुले इत्यादौ "इकोऽचीति" पा०)नित्यमाप्तं नुमं बाधित्वा "ह्रस्वो नपुंसके" इति पा० ह्रस्व । पूर्व्वं कृते तु नुमि अजन्तत्वाभावात् ह्रस्वो न स्यात् । ततश्च नुमुरूपकार्य्यं प्रत्ययस्थानरूपं निमित्तमपेक्षते इति तद्बहिरङ्ग, ह्रस्वस्तु प्रकृतिमात्रसापेक्षत्वात् अन्तरङ्ग इति तस्य बहिरङ्गनिमित्तककार्य्यबाधकत्व बोध्यम् । "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय इति" "असिद्धं बहिरङ्गमन्तरङ्गे" इति च परि० सि० को० । एतन्मूलिकैव "बहिरङ्गविधिभ्यस्तु अन्तरङ्गविधिर्बलीति" कारिका । अन्त आसन्नमङ्गं कर्म० । आरादुपकारके न० यथा ब्रह्मसाक्षात्कारे श्रवणमनननिदिध्यासनानि, सम्प्रज्ञातसमाधौ च धारणादीनि त्रीणि अन्तरङ्गाणि । यमादयस्तु पञ्च बहिरङ्गाणि । तथा हि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयइत्यष्टौ सम्प्रज्ञातसमाधेरङ्गानि तत्र यमादय बहिरङ्गाणि, प्रतिबन्धकस्य चित्तकायप्राणेन्द्रियमलस्य निवर्त्तनेन परम्परया उपकारकत्वात्, धारणादयस्तु सम्प्रज्ञातसमाधे समानविषयतया साक्षात्स्वरूपोपकारकत्वादन्तरङ्गाणीति अत एव धारणादित्रयमभिधाय "त्रयमन्तरङ्गं पूर्व्वेभ्य" इति पात० सूत्रे धारणादित्रयस्यान्तरङ्गत्वमुक्तम् । धारणादिस्वरूपादि तत्तच्छब्दे वक्ष्यते । असम्प्रज्ञातसमाधौ तु सर्व्वाण्येव बहिरङ्गाणि असमानविषयत्वादिति बोध्यम् ।

अन्तरचक्र न० अन्तर मध्यवर्त्ति चक्रम् । तन्त्रोक्तेषु देहस्थसुषुम्णामध्यस्थेषु मूलाधारादिषु षट्सु पद्माकारचक्रेषु । विवरण षट्चक्रशब्दे दृश्यम् । ६त० । आत्मीयसमूहे न० ।

अन्तरज्ञ त्रि० अन्तर भेद विशेष जानाति ज्ञा—क ६त० । विशेषज्ञे "नान्तरज्ञा श्रियो जातु प्रियैरासां न भूयते" इति किरा० ।

अन्तरण न० अन्तर व्यवहित करोति अन्तर+णिच्—भावे ल्युट् । अन्तरितकरणे व्यवधापने, "हविरन्तरणे प्राक् प्रधानेज्याया" इति कात्या० २५,५,१५, "यदि नाम हविरन्तरित न स्फीतमेव, प्राक् प्रधानेज्याया ज्ञात्वा समाहरेत् हविषोऽन्तरण बहूनां मध्ये एकस्यापहरणमिति" तद्भा० ।

अन्तरतम त्रि० अतिशयेन अन्तर सदृश, अत्यन्तसदृशे "स्थानेऽन्तरतम" इति पा० । सादृश्यञ्च "तुल्यास्यप्रयत्नमिति" पा० सूत्रोपात्त स्थानादिसाम्यम्, यथा ककारादीना ङकारादिषु तुल्यस्थानप्रयत्नवत्त्वेन साम्यम् एव सकारस्य षकारे । आत्मीयतमे च ।

अन्तरतस् अव्य० सप्तम्यर्थे तसि । मध्ये इत्याद्यर्थे । "इदमन्तरत कृत्वा रावण वाक्यमब्रवीत्" इति रामा० ।

अन्तरदृश् पु० अन्तरे दृग् यस्य । अन्तरस्थे परमात्मानुसन्धायिनि । अन्तर भेद पश्यति दृश क्विप् ६त० । विभेदद्रष्टरि त्रि० ।

अन्तरदेश पु० कर्म० । मध्यदेशे तद्विवरण मध्यदेशशब्दे दृश्यम्

अन्तरपु(पू)रुष पु० अन्तर मध्यवर्त्ती पुरुष वा दीर्घ । अन्तर्यामिनि परमेश्वरे । "मन्यन्ते वै पापकृतो "न कश्चित् पश्यतीति न" । तांस्तु देवा प्रपश्यन्ति स्वस्यैवान्तरपूरुष" इति मनु ।

अन्तरपूजा स्त्री ७त० तन्त्रोक्ते मन कल्पितोपचारेण पूजायाम् तत्प्रकारस्तु अन्तर्यागशब्दे वक्ष्यते ।

अन्तरप्रभव पु० अन्तरेभ्यो भिन्नवर्णमातापितृभ्य प्रभवति प्र+भू—अच् ५त० । सङ्कीर्णवर्णे मूर्द्धाभिषिक्तादौ । अन्तरप्रभवाश्च द्विविधा अनुलोमजा, प्रतिलोमजाश्च तत्रोत्कृष्टवर्णात् अपकृष्टवर्णाया स्त्रिया जाता मूर्द्धाभिषिक्तादय अनुलोमजा, अपकृष्टवर्णात् उत्कृष्टवर्णाया स्त्रिया जाता प्रतिलोमजा सूतादय । "भगवन्! सर्व्ववर्णानां यथावदनुपूर्व्वश । अन्तरप्रभवानाञ्च धर्मान्नो वक्तुमर्हसीति" मनु । एतेषां भिन्नवर्णजातत्वात् अन्तरनामत्वमपि मनुना हि अनुलोमजान् प्रतिलोमजांश्च उक्त्वा "तानन्तरनाम्नस्तु मातृदोषात् प्रचक्षते" इत्युक्तम् । अधिक वर्णसङ्करशब्दे वक्ष्यते ।

अन्तरय पु० अन्तर्मध्ये अय गमनम् इण्—अच् । मध्यगतौ व्यवधाने । ल्युडन्तमप्यत्र न० । अन्तरं याति या—क । देहमध्यस्थचित्तगते त्रि० ।

अन्तरशायिन् पु० अन्तरे शेते शी+णिनि । चित्तस्थे जीवे । तस्य तत्र प्रतिबिम्बरूपेण स्थितत्वात्तथात्वम् ।

अन्तरस्थ पु० अन्तरे देहमध्ये तिष्ठति स्था—क ७त० । देहमध्यस्थचित्तस्थे जीवे ।

अन्तरा अव्य० अन्तरेति इण्—डा । निकटे, मध्ये, विनार्थे च । तत्र मध्ये "अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेदिति" या० । "अन्तरा मृतसूतके" इति स्मृति । "पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभि अन्तरा गमने विद्यादनध्यायमहर्निशमिति" मनु । "सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृता" इति रघु । "अथेमे वीज-

[illegible]

मिश्वहि श्रुतौ । "योऽन्तरे माकाय मार्गोदन्तरीक्षमभव दोत हि तथाम तत पुरान्तरा वा इदागीषीक्षमभूदिति' तस्मादन्तरीक्षमिति' ।

अन्तरिक्षप्रा त्रि॰ अन्तरिक्षं प्राति पूरयति प्रा-पूरणे विच् । अन्तरिक्षपूरके "अन्तरिक्षप्रां रथेभिरादतमिति" ऋ॰ १,११९,२ । "अन्तरिक्षं द्युलोक मतेजसा प्राति पूरयतीति" विच्, भा॰ ।

अन्तरिक्षप्रुत् त्रि॰ अन्तरिक्षे प्रवते प्रुङ् गतौ क्विप् । अन्तरिक्षचरे "अन्तरिक्षप्रुद्भिरपोदकाभिरिति" ऋ॰ १,११६,३ ।

अन्तरिक्षसद् त्रि॰ अन्तरिक्षे सीदति गच्छति सद्-गतौ क्विप् । आकाशचारिणि । "हंस शुचिषद्वसुरन्तरिक्षसदिति" ऋ॰ ४,४०,५ । "अन्तरिक्षसद् अन्तरिक्षगन्तारीति' भा॰ ।

अन्तरिक्षसद्य त्रि॰ अन्तरिक्षे सदनम् सद्म सद-भावे यत् । अरिक्षसदने । "उपरि सद्य या उप नयति यो जयत्यन्तरिक्षसद्यमिति" कौ॰ ब्राह्म॰ ।

अन्तरिक्ष्य त्रि॰ अन्तरिक्षे भव यत् । अन्तरिक्षभवे । "पवतामन्तरिक्ष्या इति ऋ॰ ८,२६,५ ।

अन्तरित त्रि॰ अन्तर्-इण-कर्त्तरि क्त इत॰ । अन्तर्गते अन्तर व्यवधानं करोतीति णिचि कर्म्मणि क्त । व्यवधानीकृते, व्यवधापिते, तिरस्कृते आच्छादिते, "हिरेफवृन्दान्तरितं सरोरुहेतिति" किरा॰ । अपसारिते, "कुर्व्याद् यथास्थानकमन्तरं वेति" सीताबलावन्तरशब्दस्य वियोजने प्रयोगात् तत्प्रकृतिकतया वियोजिते च ।

अन्तरिन्द्रिय न॰ कर्म्म॰ । अन्तःकरणे ।

अन्तरीक्ष न॰ अन्तरिक्षवत्सर्वम् । [दृक्के आकाशात्पतितजले

अन्तरीक्षजल न॰ अन्तरीक्षात् पतित जलम् शा॰ त॰ । दिव्यो-

अन्तरीप पु॰ अन्तर्मध्ये गता आपोऽस्य ब॰ अप् समा॰ आत ईत्वम् । द्वीपभेदे । द्वीपस्य हि जलमध्यस्थत्वात् अन्तर्गतजलत्वात्तथात्वम् द्वयोस्तु भेद चतुर्दिक्षु जलसत्त्वे तस्य अन्तरीपत्वम् द्वयोर्दिशोर्जलसत्त्वे द्वीपत्वमित्यनयोर्भेदः । काकाक्षिगोलकन्यायात् "द्वीपोऽस्त्रियामन्तरीपमित्यत्रापि अस्त्रियामित्यस्य अन्वय इति तेनायं पु स्त्री॰ इति केचित् ।

अन्तरीय न॰ अन्तरे भव गहादित्वात् छ । "नाभौ धृतस्य वस्त्रस्याच्छादयति जानुनी । अन्तरीयं प्रभाषन्ते तद्-विचक्षणयाम्यतो" रित्येवंलक्षणे परिधाने वस्त्रे । भवाद्यर्थे धूमा॰ वुञ् । आन्तरीयक तद्भवे त्रि॰ ।

अन्तरे अव्य॰ अन्तरेति इण्-डे । मध्ये । 'आनन्द्योऽन्तरान्तरेऽन्तरा, अन्तरेण च मध्ये स्युरित्यमरः" ।

एतच्चाभवत्सु "तत एतस्मादेव परमेश्वरात् तमःप्रधानप्रपञ्चविस्तारेच्छया ... विशिष्टादाकाशादीनि भूतानि ... जायन्ते ... 'तदैक्षत बहु स्यां प्रजायेय' इति श्रुतेः। तत आकाशादीनि पञ्च भूतानि अपञ्चीकृतानि तन्मात्रशब्दवाच्यानि जायन्ते। तत्राकाशस्य शब्दो गुणः ... वायोः शब्दस्पर्शौ, तेजसः शब्दस्पर्शरूपाणि ... रसगन्धान्यतमाः। ... तु शब्दाकाशमात्रगुणता ... नायुक्तम् ... । ... बाधकाभावात्। एतानि भूतानि त्रिगुणमायाकार्य्याणि त्रिगुणान्यपि। एतैः सत्त्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते। श्रोत्रादीनां पञ्चानां क्रमेण दिग्वाताऽर्कवरुणाश्विनोऽधिष्ठातृदेवताः मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवताः। एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्म्मेन्द्रियाणि जायन्ते। तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः। रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्या जायन्ते। तत्र प्राणो नाम प्राग्गमनवान् वायुः नासाग्रस्थानवर्त्ती। अपानो नामावाग्गमनवान् पाय्वादिस्थानवर्त्ती। व्यानो नाम विष्वग्गमनवान् अखिलशरीरवर्त्ती। उदानो नाम कण्ठस्थ ऊर्द्ध्वगमनवान् उत्क्रमणवायुः ... कण्ठस्थानवर्त्ती। अशितपीताद्यन्नादिसमीकरणकरः समानो नाम नाभिस्थानवर्त्ती। तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात्। पञ्चीकरणप्रकारश्चेत्थम्। आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्भूतेषु संयोजनम्। एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषाम् आकाशादिषु संयोजनम्। एवं तेजोऽप्पृथिवीभागानामपि। तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकम् अर्द्धान्तरञ्च चतुर्व्विधभूतमयमिति पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्यवहारः। तदुक्तम्। "वैशेष्यात्तु तद्वादस्तद्वादः" इति शा० सू०। पूर्व्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्य्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्म्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते। तदुक्तम्। "पञ्चप्राणमनोबुद्धि

[illegible]

[illegible]

ष्टपत्तम् । तथा च आदिसर्गे एवैतेषां सर्वेषां सृष्टिः । नैमित्तिकप्रलयोत्तरन्तु न सर्वेषाम् किन्तु येषामेव तादृशप्रलयदशायां नाशस्तेषामेव कतिपयानामिति भेदः । बीजाङ्कुरवत् सृष्टेः प्रवाहरूपेणानादित्वेऽपि एतत्सृष्टेः सादित्वमपि तत्तद्दीनव्यक्तेरङ्कुरव्यक्तेश्च यथा सादित्वमेवमेव वर्त्तमानप्रपञ्चस्य आदिसर्गकाले महदादेरुत्पत्तेरादिमत्त्वमवगन्तव्यम् "यथेदानीमित्यादि" भागवतवचनेन "सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति" मन्त्रलिङ्गेन च प्रवाहस्यैवानादित्वं सूचितं न तु तत्तद्व्यक्तेः । कर्म्मणामेव सैव ईश्वरस्य सृष्टत्वोक्तेः पूर्वं कर्म्मणामभावे विचित्रसृष्ट्यसम्भव । अन्यथा वैषम्यनैर्घृण्ये ईश्वरस्य प्रसज्येयाताम् जीवस्य च कृतहान्यकृताभ्यागमप्रसङ्गश्चेति दिक् ।

आदीनव पु॰ आ+दी—भावे क्त आदीनस्य वानं प्राप्तिः वा॰क १दोषे, २क्लेशे, च । कर्म्मणि क । ३दुर्दृष्टे ४परिक्लिष्टे च त्रि॰ ।

आदीपक त्रि॰ आदीपयति अन्यगृहमग्निना आ+दीप—णिच्—ण्वुल् । १परगृहस्य दाहके । "दाहयेदग्निपक्वैर्दासस्य चिह्नो वधो भवेत् । आदीपकस्य स्तेनस्य वर्णसङ्करिकस्य च" भा॰ शा॰ ८६अ॰ । २उद्दीपके च ।

आदीपन न॰ आ+दीप—णिच्—ल्युट् । तण्डुलादिचूर्णमिश्रितजलेन गृहादौ १चित्राकारलेपनभेदे (आलिपना) २उद्दीपने च । [रूपादौ । २उद्दीपिते च ।

आदीपित त्रि॰ आ+दीप—णिच्—क्त । दत्तादीपने १गृहा-

आदुरि त्रि॰ आ+दृ—अन्तर्भूतण्यर्थे कि । दारयितरि "वामं वामं त आदुरे देवो ददात्वर्य्यमा" ऋ॰ ४,३०,२४ । "हे आदुरे ! शत्रूणां दारयितः !" भा॰ ।

आदृत त्रि॰ आ+दृ—कर्त्तरि क्त । १सादरे कृतादरे । कर्म्मणि क्त । यस्यादरः कृतस्तस्मिन् २सम्मानिते ३पूजिते च ।

आदृत्य त्रि॰ आ+दृ—कर्म्मणि क्यप् । आदरणीये १आदर्त्तव्ये । ल्यप् । २सम्मान्येत्यर्थे अव्य॰ ।

आदृष्टि स्त्री प्रा॰स॰ । स्त्रिविभागदर्शकोचितदृष्टौ ।

आदेय त्रि॰ आ+दा—यत् । ग्राह्ये । "षड्भागप्रभृति भागं आदेयो राजा परिहृतिरस्थयोः" "धनादेयस्य चादानादाददे यस्य च वस्तुमात्" इति च मनु ।

आदेवक त्रि॰ आदीव्यति आ+दिव—ण्वुल् । द्यूतकारके

आदेवन न॰ आ+दिव—भावे ल्युट् । १द्यूतक्रीडायाम् करणे ल्युट् । २द्यूतसाधने पाशकादौ । आधारे ल्युट् । द्यूतक्रीडाधारे (छक) ३द्यूतफलके ।

आदेश पु॰ आ+दिश—भावे घञ् । १उपदेशे २आज्ञायाम् "अथात आदेशोनेति नेतीति" छ॰उ॰ "उत तमादेशमप्राक्ष्यः" "उत स क आदेश"" । "आदित्योब्रह्मेत्यादेश" इति च छा॰उ॰ "आदेश देशकालज्ञः शिष्यः शासितुरानतः" रघु व्याकरणप्रसिद्धे कस्यचित् वर्णादेः स्थाने कस्यचिद्वर्णस्योत्पत्तौ च । आदिश्यते कर्म्मणि घञ् । ४आदिष्टे ५कथिते ६उपदिष्टे कस्यचित् स्थाने जाते कस्मिंश्चिद्वर्णे च "धातो स्थान इवादेशं सुग्रीवं सन्न्यवेशयत्" रघु॰ "आदेशप्रत्ययोः" पा॰ "आगमादेशयोर्मध्ये बलीयानागमोविधि" व्या॰कारि॰ "स्थानिवदादेशोऽनल्विधौ" पा॰ "लोपोऽप्यादेशउच्यते" व्या॰ का॰ "ज्योतिर्विदुक्ते शुभाशुभफले च "नादेशाफलस्य मिथ्याफला" इत्युक्त॰ । [कारके २आज्ञाकारके ।

आदेशक त्रि॰ आदिशति आ+दिश+ण्वुल् । १आदेश-

आदेशन न॰ आ+दिश—भावे ल्युट् । आदेशे "लतोपनयनस्यास्य व्रतादेशनमिष्यते" मनु ।

आदेशिन् त्रि॰ आदिशति आ—दिश—णिनि । १आदेशकारके "कपोलपाटलादेशि बभूव रघुचेष्टितम्" रघुः २दैवज्ञे गणके पु॰ हेम॰ । [३कथनीये च ।

आदेश्य त्रि॰ आ+दिश—कर्म्मणि ण्यत् । १उपदेश्ये २आज्ञाप्ये

आदेष्टृ पु॰ आ+दिश—तृच् । ऋत्विज प्रति अनेनैतस्मादनार्थं कर्म क्रियतामित्यादेशकर्त्तरि १यजमाने, २आज्ञाकर्त्तमात्रे त्रि॰ स्त्रियां ङीप् ।

आद्य त्रि॰ आदौ भवः दिगा॰यत् । १आदिभवे । "एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः" । "स्वायम्भुवाद्याः सप्तैते मनवो भूरितेजसः" मनु । अयौगिकान्त द्वितीयदिभक्तव्ये २प्रेतश्राद्धभेदे न॰ "मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि" या॰स्मृ॰ । तस्य षोडशश्राद्धानामादिभूतत्वात् आद्यत्वम् । "आद्यमग्निमतः कुर्य्यादाहादेकादशेऽहनि । सुतादि तु प्रकुर्व्वीत प्रमीतानां च सर्व्वदा । द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा । सपिण्डीकरणञ्चैव ह्येतत् श्राद्धषोडश" छन्दो ग॰प॰ । निरग्नेस्तु मरणाशौचमध्येव एकादशाहे तत् कर्त्तव्यमिति भेदः । एकादशपदञ्च स्वजात्युक्ताशौचान्तद्वितीयदिनपरम् । ३प्रधाने श्रेष्ठे त्रि॰ "आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव" रघु॰ अद+कर्म्मणि ण्यत् । ४अदनीयद्रव्यमात्रे त्रि॰ ५धान्ये न॰ राजनि॰ तस्यादनीयत्वात् "अन्नमूलं हि जीवनम्" इत्युक्तेश्च जीवनमूलत्वेन प्रधानत्वाद्वा आद्यत्वम् ।[स्त्रोकौ च

आद्यकवि पु॰कर्म॰ । आदिकवौ चतुर्मुखे १हिरण्यगर्भे २वा-

[illegible]

पादस्य" । कू । "स्थारन्ताक्षणं" । वन् । "श्रीणामं मेषम्" । "वर्णानान्तणतिनितान्तानाम्" १० । आदिरु-दात्त, एत हरिणः, शिति, पृश्नि, हरित्। "ह्रस्वान्तस्य ह्रस्वमन्त तात्तोल्प्ये" ११ । म्रदजं ह्रस्वा-न्तस्यादिभूत ह्रस्वमुदात्त स्यात् । मुनि । "श्रावस्यादे-वनस्य" १२ । आदिरुदात्तः, "तस्य नाव" देवने तु "अक्षैर्मा दीव्य"।"अर्द्ध स्यासमद्योतने" १३। अर्द्धो ग्राम-स्य, समेऽशके तु अर्द्धं पिप्पल्याः । "पीतद्र्वर्थानाम्" १४ । आदिरुदात्त, पीतद्रु, सरल । "ग्रामा-दीनाञ्च" १५ । ग्राम, सोम, याम । "लुमन्तस्यो पमेयनामधेयस्य" १६ । चञ्चेव चञ्चा, स्फिगन्तस्येति पा-ठान्तरम् । स्फिगिति लुप भाषा सञ्ज्ञा । "न वृक्षपर्वत-विशेषव्याघ्रसिंहमहिषाणाम्" १७ । एषामुपमेयनाम्ना-मादिरुदात्तो न । ताल इव तालः, मेरुरिव मेरु, व्याघ्र, सिंह, महिष । "राजविशेषस्य यमन्वा चेत्" १८ । यमन्वा इत्य, आङ्ग उदाहरणम् । अङ्गा मत्यु-दाहरणम् । "स्त्रीविषयवर्णाक्षुपूर्व्वाणाम्" २० । एषान्त्रयाणामाद्युदात्त, स्त्रीविषय, मक्षिका, वर्णा, श्येनी, हरिणी, अक्षुशब्दात् पूर्वोऽस्त्येषान्ते अक्षु-पूर्वाः, तरक्षु । "शकुनीनाञ्च लघुपूर्वम्" २१ । पूर्व लघु उदात्त स्यात्, कुक्कुट, तित्तिरि, । "नर्त्तुप्राण्या-ख्यायाम्" २२ । यथालक्षण प्राप्तमुदात्तत्वन्न, वसन्त, कृकवाकु । "धान्यानाञ्च वृद्धक्षान्तानाम्" २३। आदिरु-दात्त, कान्तानाम्, श्यामाका, षान्तानाम्, राज-माषा । "जनपदशब्दानामषान्तानाम्" २४ । केकय, "हयादीनामसंयुक्तलान्तानामन्त पूर्व्वं वा" २५ । हयिति हल सञ्ज्ञा । पललम्, शललम्, हयादीना किम् एकल असंयुक्तेति कि मल्ल । "इगन्तानाञ्च द्व्यषाम्" २६। आदिरुदात्तः, कृषि एतानि २पादस्थानि । "मक-रवरुडपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठायुतडा का-शीनामादिर्वा" २,६, । एषामादिर्द्वितीयो वा उ-दात्त । मकर वरुड ।"छन्दसि च" १० । अमकराद्यर्थ आरम्भः । मव्यात्मारादादिर्द्वितीयम् वा उदात्त मेयम् । "कर्दमादीनाञ्च" ११ । आदिर्द्वितीय वोदा-त्त । "सुगन्धितैलनस्य ते वा" १२ । आदि द्वितीय ते शब्दस्येति पर्य्यायेण वोदात्ता । "नप फलान्ता-नाम्" १३। आदिर्द्वितीय वोदात्तम् । राजादनफलम् । "ईपान्तस्य हयादेरादिर्वा" १४ । हलीषा लाङ्गलीषा । उशीरदाशेरकपालपलाशशैवालश्यामाकशरीरशरावहृदय-हिरण्यारण्यापत्यदेवराणाम्" १६ । "एषामादिरुदात्त स्यात् । "महिष्याषाढयोर्ज्जायेष्टकाख्या चेत्" २० । आदि रुदात्त, "महिषी जाया" आषाढा उपदधाति । एतानि २पादस्थानि । "निपाता आद्युदात्ता" फि० ४,१२ । स्वाहा "उपसर्गाश्चाभिवर्ज्जम्" फि० ४,१३ । तथा च पाणिनिशान्तनवाचार्य्यादिभिर्यस्यादेरुदात्तत्व विहितं ते शब्दा लोके वेदे च आद्युदात्ता भवन्ति ।

आद्यून त्रि० आ+दिव–क्त ऊट् नत्वञ्च । औदरिके (पेटुक) जिगीषावर्ज्जिते । जिगीषायान्तु न नत्वम् । आद्यूत । जिगीषया देवनकर्त्तरि । [भावविशेषपर्य्यन्ते ।

आद्योपान्त पु० आद्यावधि उपान्त अन्तपर्य्यन्त । प्रय-

आधमन न० आधीयते आ+धा–कमनन् । बन्धकदाने आधौ, । "योगाधमनविक्रीत योगदानप्रतिग्रहम् । यस्य वाप्युपधि पश्येत् तत् सर्वं विनिवर्त्तयेत्" स्मृति. "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्" स्मृतिः एकोऽक्षमोऽपि सर्वत्र दानाधमनविक्रये" कात्या०स्मृतिः आधिशब्देऽस्य विवृति ।

आधमर्ण्य न० अधमर्णस्य भाव कर्म वा ष्यञ् । ऋणग्रहणे अवश्यदेयद्रव्यस्वामित्वे "आवश्यकाधमर्ण्ययोर्णिनि" पा० ।

आधर्म्मिक त्रि० अधर्म चरति ठञ् । अधर्मशीले दैववशात् अधर्म्मानुष्ठातरि तु नास्य साधुत्वम् । अधार्म्मिक इत्यत्र तु न धार्म्मिक इति विग्रह इति भेद ।

आधर्ष पु० आ+धृष–भावे घञ्। १तिरस्कारे २बलात्पीडने च

आधर्षण न० आ+धृष–भावे ल्युट्। १आधर्षे २बलात्पीडने।

आधर्षित त्रि० आ+धृष–क्त अवैयात्ये इट् गुणश्च । १अवमा-निते २तिरस्कृते ३बलात्कारेणाभिभूते च "स्मृत्याचारव्य-पेतेन मार्गेणाधर्षित परै । आवेदयति चेद्राज्ञे व्यवहा-रपद हि तत्" या० स्मृति धार्ष्ट्ये तु आधृष्ट इत्येव ।

आधर्ष्य त्रि० आ+धृष–णिच्–यत् । १अवमाननीये २बलात् पीडनीये ३दुर्बले च भावे यत् । ४ दुर्बलत्वे न०। "आध-र्ष्यं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् । विवादे साक्षिण-स्तत्र प्रष्टव्या प्रतिवादिन" नार० । "आधर्ष्य दुर्बलत्वम्" व्य०त०रघु०।

आधान न० आ+धा–भावे ल्युट् । संस्कारपूर्व्वक यज्ञार्थे स्थापने १अग्न्याधाने २गर्भाधाने च । "आधाने सोम-पाने च वपन सप्तसु स्मृतम्" प्रा०त०पु० "भार्य्यायै पूर्व्व-मारिण्यै दत्त्वाग्नीनन्त्यकर्मणि। पुनर्दारक्रियां कुर्य्यात्

धातुमाक्षिक न० धात्वोपमेष मत्ये मन् कर्म । मदहका वरिकाचे, (तापा) इति ख्याते धातुः वा कथर्या" दातुरोऽपाभिषेकम् तत्र धातुभिषेकोकोविदा धौषताय तदामन् वदत "दुषादुष स्पर्शेत धातु- भिरिति धातुराजाय्वे धातुर मदनमाक्षकनीयोप्य ।

धातुवीज न० कर्म । मूलधात्वे धातिकात्वे । देवरी वीजकवी धातुवी च ।

धातुमा स्त्री धातुभवा स्त्रिया मत् । इन्योक्त धातोव्याधा मुम- भेते धातुमादौ च चले ह तत्री धातुमा मैधावी मत- मेधरो तापरे मातिजो धातुमा वची धाती प्रयोविंश" दक्षुमाताम्यो हि धात्वा वधानम्" । धातिमात्रा वि धातो च । "तुष्णाया धमधिवे मि" मि ह इत ।

धातुमाक्षी स्त्री मिश्रम पंचासान हव । धातवेपनमाप धातो धनेवाधादिइतिको । धातुमाहादिइमात धातुमाक्षीति गीयते विशेषसमोक्षायां गदरवाणी

धातुमारि न० धातिषाो वक्ष । मदुमाताको वनिमव विविदे का वा वक्ष मदकव्यते । ह च धातु, धनवा मम इन धाम धातुमित्र: दैव खातो वदेतो भैदि" विद्वत् ।

धातुइत्त लि० धातुर वहाओ वत्र । वत्र धातिइरताः धातुवे प्रसवादी । ह च धातिवाधादिविदितः "प्रसवा" इतपिकारी "धातुइतः" वा धवति धवताते धातिति प्रसव धातुइतः । वर्णवस तेति धवाम । "धनादि- दिवावात्मविधि वा धराइत्मवधातोविसराव निदि वधाती वधाशेनाइते वदे धातिइताको वा । वहति इतम भतम वा धराइतः । "धमराधाधाति" वा० स्पर्शीतिने धन्नवर्ष प्रधानाधादिइतात । इवति इताते दैवमोतक्षया धतुदाने "च"वा धतिवाधादेवाते च इत्यादौ वदे वधावाधातिदितात । इत्यादि धववा धारि दैवमोपापधा "धातिवधामधावधाम् वा धमपावधान दिवाहि वदे वराको वा । मीषूप मीषूपन् स्व मिझरा । "धवा वर्षयति" वा धववतेरि वधि दवे धमरेवतदधावादिइताको वा । तुवते वैरार व्यसिन । "वरा इदि वा इदि वदे दरावमा धारि वराम वर्णे वम दैवमोतक्षया । "धनिमावादिनिमिन्"वा विधवच दिवधाताविइताः । धनोनिवान् मदवधारि- दराम धनिवरो धराववधाते वा धनमीतादिइताम धरावधवाधे वदे । इवा वैवदात । धर्वोनिघाते वा

निघावाते धवधादिइतातः । "धवा धरवम् वा धरवारी धवनत् धातुइतः । "धवादिधाव वा प्रवाधादिइतातः । इव मम भर धव इव मम मव मम मम मम मम भैद वद धव इव (धवरची वंधावम्) (वंधरी धावधवोः), धवा धाति मान मान हात धातु धाता मन मन मात । "धातिवधलात धविविदम- धनाधुदाधना दर्शति "धेयन्"रि मी । "धवात- धवादम् वा चव च धरा । "विश च इववाद"वा मिहावक प्राप वंधामाधादिइता मताधराम । इन । धातारत धाता । "पुष्पदाती वा धवाधुदाती धर्वधाताम् "धाविवा धर्व" वा धर्वुधाती धाविवधम् धातुइता "रिहो मिधवा" वा रिहवादिइतातः धर्वधाताम् । वरा- मिति च वव्रति" वा धवी धातुइतारी धर्वधाताम् "इवदवरोर्भवि"वा धवयोः धति वदे धातिइता । "वधि च वा धमवीर्भवि वदे धातिइताव । "धरो- धाता"वा वदवधवाधव प्राप धातिइतातः धर्व मिता । मधम धाधा । "देववधवधहुरी धवा वा धव धातावैताधादिइतातः । निधाता वैविमवमवी" वा इवमीतादिइतातः । "धावराववाधवधवमाधाम्"वा इवाम धातिइतातः । विइवधने धावमधाताधीत इति धातुइता धवा धवा इतिवत धाती" मि धातावधदिवधमधादिइतातीना इविमोताक्षः "ध- वधि च" वि० धवमीतमोतादि"मि "धवधोतादि- इताव "धबुरोद्दवमधधातां धवधवा मि धीमे ह धातिइताव "धवादि प्राप वधो मि १धाते १व । धविधातीधवन् वधदिवचोतिमि धातम । "तुधावद धोधिमवाः । धातिइताव धाप्, धवि वहा "धव् विवमवविमधव"१।धर्व दवा । दवमव ह दर्वीः । धव वव धवम् "प्रवधाधातां च प्राप्ताम् ३। प्रपातिवधी। इवाः धावाः धाधा विधा वइवाघ धीयवा । "पु वंधावा" १ । धतु धवधा । "धातुविवावधा- माषु" १ । मिर धवधाव "वधीमां इतुप्रवदि" "धी- धातिव वतु "विधी विदावा । "धाविवां इतुवैव वा धव्मीइ इर्व धातिइताम् । धावा इवा "इवी- मे" । धातिवां विवु "धीरवतिर्वदूवम्" । धवु- दवे धतिवाधावा मिनु दा । धति वदे धववाइताव धाप् धवधूव "धवम नमावाम्"८ । धव । "धवदं नोति

वादसम्” । भद्र । “स्वधारन्त्वाक्षणनै” । धनु । “श्रीवानं मेयम्” । “वर्णानान्तणतिनितान्तानाम्” १० । आदिरुदात्त, एत हरिणः, शिति, पृश्नि, हरित् । “ह्रस्वान्तस्य ह्रस्वमन्त तात्स्त्रीस्ये” ११ । ह्रस्वं ह्रस्वान्तस्यादिभूत ह्रस्वमुदात्त स्यात् । मुनिः । “अक्षस्यादेवनस्य” १२ । आदिरुदात्तः, “तस्य नाक्ष” देवने तु “अक्षैर्मा दीव्य” । “अर्द्धस्यासमद्योतने” १३ । अर्द्धो ग्रामस्य, समेऽर्धके तु अर्द्ध पिप्पल्याः । “पीतद्र्वर्थानाम्” १४ । आदिरुदात्त, पीतद्रु, सरल । “ग्रामादीनाञ्च” १५ । ग्राम, सोम, याम' । “लुमन्तस्योपमेयनामधेयस्य” १६ । चञ्चेव चञ्चा, स्फिगन्तस्येति पाठान्तरम् । स्फिगिति लुप प्राचा सञ्ज्ञा । “न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्” १७ । एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव ताल, मेरुरिव मेरु, व्याघ्र, सिंह, महिष । “राजविशेषस्य यमन्वा चेत्” १८ । युमन्या वृद्ध', आङ्ग उदाहरणम् । अङ्गा प्रत्युदाहरणम् । “स्त्रीविषयवर्णाक्षुपूर्व्वाणाम्” २० । एषान्त्रयाणामाद्युदात्त, स्त्रीविषय, मल्लिका, वर्ण, श्येनी, हरिणी, अक्षुशब्दात् पूर्वोऽस्येयान्ते अक्षुपूर्वा, तरक्षु । “शकुनीनाञ्च लघुपूर्वम्” २१ । पूर्वं लघु उदात्त' स्यात्, कुक्कुट, तित्तिरि, । “नर्त्तुप्राख्याख्यायाम्” २२ । यथालक्षण प्राप्तमुदात्तत्वन्न, वसन्त, ककवाक । “धान्यानाञ्च वृद्धक्षान्तानाम्” २३ । आदिरुदात्त, कान्तानाम्, श्यामाका, षान्तानाम्, राजमाषा' । “जनपदशब्दानामषान्तानाम्” २४ । केकय, “हयादीनामसंयुक्तलान्तानामन्त पूर्व्वं वा” २५ । हयिति हल सञ्ज्ञा । पललम्, शललम्, हयादीना किम् एकल असंयुक्तेति कि मल्ल । “इगन्तानाञ्च द्व्यषाम्” २६ । आदिरुदात्तः, कृषि एतानि २पादस्थानि । “मकरवरूडपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठायुतवा काशीनामादिर्वा” २,९, । एषामादिर्द्वितीयो वा उदात्त' । मकर वरूड ।“छन्दसि च” १० । अमकराद्यर्थ आरम्भ' । सप्तमात्सारादादिर्द्वितीयम् वा उदात्त मेयम् । “कटमादीमाञ्च” ११ । आदिर्द्वितीय वोदात्तः । “सुगन्धितेजनस्य ते वा” १२ । आदि द्वितीय ते शब्दश्चेति पर्य्यायेण वोदात्ता । “नप फलान्तानाम्” १३ । आदिर्द्वितीय वोदात्तम् । राजादनफलम् । “ईयान्तस्य हलादेरादिर्वा” १४ । हलीया लाङ्गलीया । उशीरदाशेरकपालपलाशशैवालश्यामाकशरीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्” १९ । “एषामादिरुदात्तः स्यात् । “महिष्याषाढयोर्जायेष्टकाख्या चेत्” २० । आदिरुदात्त, “महिषी जाया” आषाढा उपदधाति । एतानि ३पादस्थानि । “निपाता आद्युदात्ता” फि० ४,१२ । स्वाहा “उपसर्गाश्चाभिवर्ज्जम्” फि० ४,१३ । तथा च पाणिनिशान्तनवाचार्य्यादिभिर्यस्यादेरुदात्तत्वं विहित ते शब्दा लोके वेदे च आद्युदात्ता भवन्ति ।

आद्यून त्रि० आ+दिव–क्त ऊट् नत्वञ्च । औदरिके (पेटुक) जिगीषावर्ज्जिते । जिगीषायान्तु न नत्वम् । आद्यूत । जिगीषया देवनकर्त्तरि । [मायविशेषपर्यन्ते ।

आद्योपान्त पु० आद्यावधि उपान्त अन्तपर्यन्त । प्रथ-

आधमन न० आधीयते आ+धा–कमनन् । बन्धकदाने आधौ, । “योगाधमनविक्रीत योगदानप्रतिग्रहम् । यस्य वाप्युपधि पश्येत्तत् सर्वं विनिवर्त्तयेत्” स्मृतिः “एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्” स्मृति० एकोऽप्यनीश सर्वत्र दानाधमनविक्रये” कात्या० स्मृतिः आधिशब्देऽस्य विवृति ।

आधमर्ण्य न० अधमर्णस्य भाव कर्म वा ष्यञ् । ऋणग्रहणे अवश्यदेयद्रव्यस्वामित्वे “आवश्यकाधमर्ण्ययोर्णिनि” पा० ।

आधर्म्मिक त्रि० अधर्मं चरति ठञ् । अधर्मशीले दैववशात् अधर्म्मानुष्ठातरि तु नास्य साधुत्वम् । अधार्म्मिक इत्यत्र तु न धार्म्मिक इति विग्रह इति भेद ।

आधर्ष पु० आ+धृष–भावे घञ् । १तिरस्कारे २बलात्पीडने च

आधर्षण न० आ+धृष–भावे ल्युट् । १आधर्षे २बलात्पीडने ।

आधर्षित त्रि० आ+धृष–क्त अधर्षयात्ये इट् गुणश्च । १अवमानिते २तिरस्कृते ३बलात्कारेणाभिभूते च “स्वत्याचारव्यपेतेन मार्गेणाधर्षित परै' । आवेदयति चेद्राज्ञे व्यवहारपद हि तत्' या० स्मृति भाष्येऽत्र आष्टष्ट इत्येव ।

आधर्ष्य त्रि० आ+धृष–णिच्–यत् । १अवमाननीये २बलात् पीडनीये ३दुर्बले च भावे यत् । ४ दुर्बलत्वे न० । “आधर्ष्यं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् । विवादे साक्षिणस्तत्र प्रष्टव्या प्रतिवादिन” नार० । “आधर्ष्य दुर्बलत्वम्” व्य०त०रघु० ।

आधान न० आ+धा–भावे ल्युट् । संस्कारपूर्व्वक वह्न्यादे स्थापने १अग्न्याधाने २गर्भाधाने च । “आधाने होमयागे च यपन सप्तसु स्मृतम्” प्रा०त०पु० “भार्य्यायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि । पुनर्दारक्रिया कुर्यात

सर्वदोषमाह मदनरत्ने सुमन्तुः "पिता यस्य तु नाधानं कथं पुत्रस्तु कारयेत्। अग्निहोत्रेऽधिकारोऽस्ति यज्ञस्य वचनं यथेति" नाधानं कृतमित्यर्थे एतदाम्नायामेवेति हेमाद्रिः यत्तु "पितुः सत्यप्यनुज्ञाने नादधीत कदाचनेति" तत्सत्यधिकारे ज्ञेयम्"। एवं स्मृतिकृत्योराधानस्याकरणे प्रत्यवायश्रवणादाधानं नित्यमेव। एतेन कलिवर्ज्ज्येषु आदित्यपुराणेऽग्निहोत्रस्योत्कीर्त्तनदर्शनेन गौडानां तदनाचरणमनाचार एव स्मृतेत पुराणस्य दुर्बलतया स्मृतिविहिताधानस्य बाधकत्वायोगात् "नैवानाहिताग्निर्म्रियेतेति" श्रुतेः सर्वापेक्षया बलवत्त्वाच्च। तेन मृत्युकालात् पूर्व्वमप्याधानं कर्त्तव्यमिति प्रतीयते व्यक्तं भविष्यति चैतदुपरिष्टात्। आधानस्वरूपादिकम् आश्व०श्रौ०सू० नारायणीयवृत्त्योर्दर्शितं यथा "अग्न्याधेयप्रभृतीन्याह वैतानिकानि" सू० १२। अग्न्याधेयप्रभृतिरादिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि अग्निहोत्रादीनि कर्माणि, आधानं कृत्वैव कर्त्तव्यानीत्यर्थः। तत्र हेतुमाह, वैतानिकानीति। वितानेषु भवानि वैतानिकानि, वितानसाध्यानीत्यर्थः। वितानशब्दोऽस्मिन् सूत्रे भावसाधनोऽग्नीनां विस्तारवाची, पूर्वस्मिंस्त्वधिकरणसाधनोऽग्निहोत्रादिकर्मवचनः। एतदुक्तं भवति, गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि, अग्नयस्त्वाधानसाध्याः, तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्मणाम्। बहुवचनं सर्वश्रौतपरिग्रहार्थं सर्वाणि श्रौतान्याधानादूर्द्ध्वमेव कर्त्तव्यानि न किञ्चिदपि, श्रौतमाधानादर्वागित्यनेन प्रकारेणाधानस्य कर्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात् साधितं भवति। तद्यदि कर्मार्थं स्यात् प्रति कर्म क्रियेत, तत्र कस्यचित् परस्तादपि स्यात्, यस्य परस्तादाधानं स्यात् तस्याग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः श्रामणत्यादयो न भवन्ति, अवकीर्णिना पश्वाद्यर्थमाधानं न कर्त्तव्यं साधितं भवति न परस्तात्" वृत्तिः। "अग्न्याधेयम्" १,२,९, सू० प्रथमप्राप्तमाधानमुच्यते। विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैर्मन्त्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थं यदङ्गाराणां निधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयमग्न्याधेयं, तत्कर्त्तव्यमित्यर्थः वृत्तिः। कस्मिन् काल इत्याह। "कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः" १०सू०। एतेषां कस्मिंश्चित् ११। वसन्ते पर्वणि ब्राह्मण आदधीत" १२। ग्रीष्मवर्षाशरत्सु च क्षत्रियवैश्योपकृष्टाः १३। यस्मिन् कस्मिंश्चिदृतावादधीत" १४। सूत्राणि एषां नारायणीया वृत्तिः "फल्गुनीष्विति पूर्वे उत्तरे च गृह्येते, अविशेषाद्बहुवचनाच्च। प्रोष्ठपदास्तूत्तरे एव। अत सप्त एतानि नक्षत्राणि, तेषामेकस्मिन्नक्षत्रेऽग्न्याधेयं कर्तव्यमित्यर्थः १०। एतेषां कस्मिंश्चित् पर्वणि। एवमेतत्सूत्रमर्थतो द्रष्टव्यम्। उत्तरञ्च सूत्रं "वसन्ते पर्वणि ब्राह्मण आदधीत" इति। एवं कृते सर्वमनुगुणं भवति एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि वाग्न्याधेयं कर्तव्यमितीदं सूत्रं पर्वनक्षत्रसमुच्चयमग्न्याधेयस्य कालत्वेन विदधाति। पूर्वसूत्रन्तु केवलं नक्षत्राणामेवाधानसम्बन्धं विदधाति। अतो द्वौ पक्षौ स्तः। समुच्चयस्तत्र प्रथमः कल्पः। तदसम्भवे केवलं नक्षत्रमेवेति विनिवेशो युक्तः। इदं कल्पद्वयं सोमाधानवर्जितेषु सर्व्वेष्वाधानेषु भवति ११। इदमपि सूत्रमर्थत एवं भवति। अनेन वसन्ते ब्राह्मणगुणकमाधानं विधीयते १२। वैश्यस्तक्षकर्मोपजीवी उपकृष्ट इत्युच्यते। अस्मिन् सूत्रे त्रीण्याधानानि विधीयन्ते। ग्रीष्मे क्षत्रियगुणकं, वर्षासु वैश्यगुणकं, शरदि उपकृष्टगुणकञ्च। एते वसन्तादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षट्। वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराः। ते च चैत्रमासमारभ्य द्वौ द्वौ मासावृतवः। वसन्तादयो मासाश्चैत्रादय एव १३। आदधीतेति स्थिते पुनरादधीतेतिवचनं आपत्कल्पोऽयमाधानविधिरिति दर्शयति। आत्यापदि मुमूर्षोः सर्व्वेष्वृतुषु आधानं कर्तव्यं 'नैवानाहिताग्निर्म्रियेतेति'। इदञ्चापरमाधानं, पूर्वोक्तानि चत्वारि, तेषु सर्वेषु पर्व्वनक्षत्रविधयः उपसंहर्तव्याः, न पर्व्वर्तुस्वातन्त्र्येणाधानस्य कालविधयो भवेयुः। अत एव सूत्रकारः पर्व्वनक्षत्रविधीनामृतुविधिभिः सम्बन्धानामेवाधानकालताप्रदर्शनार्थमेवैतेषां कस्मिंश्चिद्वसन्त इति पर्वनक्षत्रसमुच्चयविधिपरे सूत्रे उत्तरसूत्राय पठितव्यम् ऋतुशब्दं व्यतिषज्य पठितवान्। पर्व्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च नास्ति, तत्रैव तयोरन्तर्भावदर्शनादिति १४। "अश्वत्थाच्छमीगर्भादरणी आहरेदन्वेवसायः १६। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं त्वाहरामि ब्रह्मणा यज्ञियैः केतुभिः सहेति, पूर्णाहुत्यन्तमग्न्याधेयम् १७। शम्या गर्भः शमीगर्भः। शमीगर्भाद् अश्वत्थादरण्याहरणं कुर्यात्। तच्चाधानार्थम्, आहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानो-

त्वनेन सह धारयेत् । अग्निहोत्रा गार्हपत्ये
भावा । अन्वाहार्यपचने कुर्यात् न कुर्यादिति भाष्यते
भवाय । अन्वाधिकाराय तत्पर्यं । एकाग्निरिच्छे यत्र
तत् पूर्वोक्तक्रमम्, अन्यार्थे कर्तव्यम् । तत्राग्न्याधेय
मरस्ताद्युपादि पूर्वोक्तक्रमम् वक्ष्यते । अथ पूनरा
धानेऽपि पूर्वोक्तक्रमे कालविशेषनियमानि । कथमिति चेत् ।
श्रुतिविधानात् । "वसन्ते ब्राह्मणोऽग्नीनादधीत" इति
प्रस्तुत 'वसन्त ब्राह्मणोऽग्निमादधीत' इत्येवमादीनि च-
त्वारि वाक्यानि ब्राह्मणादिवर्णानां वसन्तादिकालान्
ग्रहादि विदधानानि आधानानि विधाय "यदोः
स्वी आदधीत, वसन्ताय ब्राह्मणः अन्याधानानि
कुर्वीत, वैशाख यदि ब्राह्मणपूर्वकमिदं विद्-
ध्यात्, यदि ब्राह्मणं यजेत, यदि आदधीत
आधानेन सम्पादितत्वात्, ब्राह्मणादिपूर्वकत्वे यथा
रोच यदि ता गार्हपत्यादीनादध्यात्, तत यदि, न
नित्य आदध्यात् अग्निहोत्र मू्च्छनात्, पूर्वोक्तादि
बुद्धयात् तत्र वाक्यमवलम्ब्य निर्वहेत् सम्परेत्,
तद्रत्नादिर्यत्सम्पादितानां आधानं अधिकृत्य कार्ये सः
आमन्त्रणीत निर्वहेत् तदाधानानि कर्मणि इति १० ।
तस्य निरामानद्वयं पीठासनपूर्वं अन्यतमाने कार्यां
प्रायश्चित्तेषेति यावदात्मानं यथा । आधानम् प्रति
स्वात्मवेदादिति यावे तु अन्याधानात् अन्याधानात् यदि
कर्मे इति गौणम् यजेत याग पवित्रेण इति
आदि पुनर् यदाधाने स्थिरेण अनुविधानात् । आ
यासक्येन यावित्येन गृहीतिरिच्छे नित्यपौरेषा ।
पीठासने निवेश नियमप्रवाहेना । आप पौष्णमाशी
न वा । आधा+नौ कर्मे आधारे एकवाक्यता-
सारेण "एकवाक्यत्वाने साधा १।१,८ । आधान
पूर्वक भाष्यसारि प्रत्याख्यान यज्ञेषु विना "अग्निरेव
देवानामवमो विष्णुः परमः तदन्तरेण सर्वा अन्या देवताः
यजेत तत्र वाक्यमेवौत्पत्तिको एकवाक्यानि आधा-
नादि तत्र पौषमासादि यदि वाक्यं स्थान् तथा च
यजु । "अग्निरेवाग्नीषोमीयमभिषुण्वोऽवदानेन
आध्वर्यवेऽज्यमानोऽन्यतमदवदानमधिकृतानामविशेषः तत्र
मेव अवदानं निष्कृतम् ।(इत्येकं तत्र यागं)इत्यादाने इ
आधाय अव्य आ+धा ल्यप् । इत्यादिनिर्देशे इत्यादाने
आधायक त्रि आ+धा-ण्वुल् । आधानकारके ।
आधायिन् त्रि आधान अर्थार्थ मनोरथतया इत्यादि ।

सर्वार्थानिविद्ये वेदविद्ये सर्वकामकारक्षे ।
आधार पु आ+धृ-आधारे घञ् । आधिकरणे आधारे,
अधिकरणाख्यकारकम् इत्या "कटस्योपरि पुरुष
अधिकरणत्वे भवे इत्या 'कटाधिकरणे विवेकनिरूपण
होतव्य दर्शिते" मा इति । एकाधारत्वादि पौष-
त्व विशेषविषयविभाज्यत्वे अभिव्यक्तत्वादि, तत्र
ब्यापकत्वं अवयवत्वं इत्याके इत्यादि तत्
सादृश्ये एकाधारे च । आधारत्वमन्तरेणैवेति तु ।
"आधारोऽधिकरणम्" इति अधिकरणत्वं आधारत्वं-
स्वा च विभाव्या अधिकरणत्वम् विवक्षितं तत्र सिसि-
वत् पौर्व विशेषविषयविभाज्यत्वेऽत्र । तत्र पौष-
विषय एकदेशत्वत्व कथा तत्र आप । वैयाकरणे बोधे
इत्यादि । अधिकारः विशेषु बहवति । तत्र-
बोधकत्वम् 'वाचीनाचे परिबोधनोपमानादपि' इति
वाचीकरणम् भावाकलपितम् । अधिकृत्य भावा
पौर्णमासादावपि तदर्थेन महापदमीकरणोऽपि
न तत्र विवक्षितमिति आचिकीषाः । एकार्थे तद्-
वचनके आधारकत्वावाले आधारे विशेषधनी प्रहण
कुर्वे आनुपूर्व्ये वर्तते आवश्यकी । आधारवत्
तत् आधारता तन्मात्रविशेष तदर्थविशेषाभ्यां प्रत्यक्षा-
दयो तत्र विषयते तथा च आधारता आधेयता नित्-
यता आधेयता च आधारता इति तयोः सत्त्व
विशेषविशेषभावः । आधारता अवयवितावृत्ति
आधारतावच्छेदक । एकाधिकरणता अवयविताबृत्ति
सर्वं आधेयतावच्छेद तथा अवयवे प्रकारे
भूते भूतलतावच्छेदक एकाधेय तत्र च भाव
आधेयतावच्छेदक संयोगावच्छेदकत्वात् आधारताधा-
राधेयता आधेयता तथा बलानिष्ठा आधेय
इत्येषा तथा भूतलतानिष्ठा भूतलवृत्तित्वमाश्रित इति
अवयवित्वविवक्षा रीति आधारत्वम् । अद्वेन ।
आधारशक्ति स्त्री आधारस्य शक्तिः । तदाधारशक्तिमान्
सर्वेषामाधारे तत्र आधायाः एकशक्ति न तदाधारं भूता-
धारत्वात् प्रकृतिविशेषं एवमेवाधारत्वात् । इतोऽनुमानेन
देवं देवे न "आधारशक्ति प्रकृतिविशारदि" इत्यत्र "प्रा-
धादित्वमित्याख्येन पीठशक्तिः प्रकृतेत्" इत्यत्र पीठशक्ति-
प्रदेशान् निर्दिश ।
आधाराधेयभाव पु आधारत्वेन आधेयत्व ।
तत्र तदाधेयता आधारतायां कारणं तदधिकरणे तत्र

आधेयस्य तादृशे सम्बन्धभेदे। यथा घटभूतलयोः।

आधि पु० आधीयतेऽभिनिवेश्यते प्रतीकाराय मनोऽनेन आ+धा—कि। मानसदुःखकारके व्यथाभेदे "नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः" भा०भा०। "यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः" शकु०। आधिदैविकशब्देऽस्य विवृतिः। ईषत् अधिक्रियते उत्तमर्णोऽत्र आ+ईषदर्थे धा—अधिकारार्थे आधारे कि आधीयते ऋणशोधनार्थम् आ+धा—कर्मणि किवा १ऋणशोधनार्थं प्रतिभूस्थानीयतया बन्धकत्वेन उत्तमर्णस्य समीपे अधमर्णेनाधीयमाने उत्तमर्णस्य ईषत्स्वत्वहेतुभूतव्यापारविशिष्टे २द्रव्येऽस्य विवृतिः मिता०। "धनप्रयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च। यथाह नारदः। "विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव चेति"। तत्र प्रतिभूर्निरूपित इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णाधिक्रियार्थं आधीयत इत्याधिः स च द्विविधः कृतकालोऽकृतकालश्च पुनश्चैकैकशो द्विविधः गोप्यो भोग्यश्च। यथाह नारदः। "अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः। कृतकालोऽपनेयश्च यावद्देयोद्यतस्तथा। स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति"। कृतकालः आधानकाल एवास्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः आत्मसमीपे नेतव्यो मोचयितव्य इत्यर्थः। देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः। यावद्देयम् उद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः गोप्यो रक्षणीयः। एवञ्चतुर्विधस्याधेर्विशेषमाह। "आधिः प्रणश्येत् द्विगुणे धने यदि न मुच्यते। काले कालकृतो नश्येत् फलभोग्यो न नश्यति" या०। प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तदा नश्यत्यधमर्णस्य धनप्रयोक्तुः स्वं भवति। कालकृतः कृतकालः आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात्प्रागूर्द्ध्वं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः "काले कालकृतो नश्येदिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्तः "फलभोग्यो न नश्यतीति" पारिशेष्यादाधिः प्रणश्येदित्येतद्विषयेऽकृतकालगोप्याधिविषयमवतिष्ठते। द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षणं कर्त्तव्यम् बृहस्पतिवचनात् "हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ। बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च। तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयादिति"। नन्वाधिः प्रणश्येदित्यनुपपन्नम् अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् मनुवचनविरोधाच्च "न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः" इति। कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति न च विक्रयः एवमाधीकरणविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति उच्यते आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः। आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुः प्रसिद्धः। तत्र धनद्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्तनिवृत्तेरनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिरुत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति। न च मनुवचनविरोधः यतः "न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति" भोग्याधिं प्रस्तुत्येदमुच्यते "न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः" इति भोग्यस्याधेश्चिरन्तनकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वं नास्तीति। इहाप्युक्तं "फलभोग्यो न नश्यतीति"। गोप्याधौ तु पृथगारब्धं मनुना। "न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेदिति"। इहापि वक्ष्यते "गोप्याधिभोगे नो वृद्धिरिति" आधिः प्रणश्येद्द्विगुण इति तु गोप्याधिं प्रत्युच्यत इति सर्वमविरुद्धम्। किञ्च "गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते। नष्टो देयो विनष्टश्च दैवराजकृतादृते" या०। गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति। अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्द्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति सम्बन्धः नष्टो विकृतिङ्गतस्ताम्रकटाहादिश्छिद्रभेदादिना पूर्ववत् कृत्वा देयः तत्र गोप्याधिर्नश्येत् पूर्ववत् कृत्वा देयः। उपभुक्तोऽपि चेद् वृद्धिरपि हातव्या भोग्याधिर्यदि नष्टः तदा पूर्ववत् कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्या हातव्या विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूलनाशः "विनष्टे मूलनाशः स्याद्दैवराजकृतादृते" इति नारदवचनात्। दैवराजकृतादृते दैवमग्न्युदकदेशोपप्लवादि।

[illegible]

[illegible]

एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि याव-न्मूलदानं तावदुपभुङ्क्ते एवाधिम् एतदेव स्पष्टीकृतं वृहस्प-तिना “ऋणी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम्। यदि प्रकर्षितं तत्स्यात्तदा न धनभा-ग्धनी। ऋणी च न लभेद्बन्धं परस्परमतं विना” अस्यार्थः। फलम्भोग्यं यस्यासौ फलभोग्यः बन्ध आधिः स च द्विविधः सवृद्धिकमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र सवृद्धिमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी। यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धि-मात्रापाकरणार्थन्तु बन्धं सामकन्दत्त्वा प्राप्नुयादृणी। समं मूलं सममेव सामकम्। अस्यापवादमाह। यदि प्रक-र्षितं तत्स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरभ्यधिक-फलं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेद्बन्धं, मूलमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्धयेऽप्यपर्य्याप्तन्तदा सामकं दत्त्वापि बन्धम् न लभे-तमर्णः वृद्धिशेषं दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवाद-माह। परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परा-नुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम्। परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूलदानन्तावदुपभुङ्क्ते धनी नि-कृष्टमपि मूलमात्रदानेनैवाधमर्णो लभत इति”।

आधिकरणिक पु० अधिकरणे विचारस्थाने नियुक्तः ठक्। विचारस्थाने नियुक्ते प्राड्विवेकादौ।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अति-शयितायाम्। “यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः” मनुः “युग्मायामपि रात्रौ चेत् शोणितं प्रचुरं तदा। कन्या च प्रभवेत् नवति शुक्राधिक्ये पुमान् भवेत्” ज्योतिस्तत्त्वम् “प्रातिपदिकमात्रे लिङ्गमात्राद्याधिक्ये” सि० कौ० “एव-मेतद्गुणाधिक्यं द्रव्ये द्रव्ये व्यवस्थितम्” सुश्रु०।

आधिज्ञ त्रि० आधिं मनःपीडां जानाति अनुभवति ज्ञा–क ६त०। व्याधानुभावके व्यथिते अमरपालः।

आधिदैविक त्रि० अधिदेवं भवः देवान् वातादीन् अधि-कृत्य प्रवृत्तो वा ठञ् अनुशतिका० द्विपदवृद्धिः। देवाधि-कारेण प्रवृत्ते, शास्त्रे “अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च” मनुः देवताऽधिकारेण प्रवृत्तवेदभागस्तु उपनिषत्प्र-सिद्धः। वातादिनिबन्धने २दुःखे च। दुःखं हि त्रिवि-धमाध्यात्मिकादिभेदात् तेषां स्वरूपकारणविभागादि सु-श्रुते दर्शितं यथा

“तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविक-मिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथाऽऽदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः सङ्घातबलप्रवृत्ताः कालबलप्रवृत्ताः दैव-बलप्रवृत्ताः स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातु-रपचारात् पङ्गुजात्यन्धबधिरमूकमिन्मिनवामनप्रभृतयो जाय-न्ते तेऽपि द्विविधा रसकृता दौर्हृदापचारकृताश्च॥ दोष-बलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधाः शारीरा मानसाश्च त एते आध्यात्मिकाः॥ सङ्घातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एत आधिभौति-काः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमि-त्तास्तेऽपि द्विविधा व्यापन्नर्त्तुकृता अव्यापन्नर्त्तुकृताश्च॥ दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उप-सर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशा-चादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ता क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृता अकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता एत आधि-दैविकाः”। एतदभिप्रायेणैव “अथ त्रिविधदुःखात्यन्त-निवृत्तिरत्यन्तपुरुषार्थः” इति सा० सू० “दुःखत्रया-भिघाताज्जिज्ञासा तदभिघातके हेतौ” सा० का० दुःख-त्रयञ्च विवृतञ्च सां० त० कौ०। “दुःखानां त्रयं दुःख-त्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वात-पित्तश्लेष्मणाम् वैषम्यनिमित्तं, मानसं कामक्रोधलोभ-मोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैत-दान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपाय-साध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधि-भौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधि-दैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम्”। “ताप-त्रयोन्मूलनम्” भाग० १स्क० उक्तम्। दुःखञ्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणादिधर्म इति सांख्या-दय। अन्तःकरणादेः त्रिगुणात्मकप्रकृतिकार्य्यत्वात् मोहप्रीतिविषादानां त्रिगुणधर्म्माणां स्वस्वकार्य्ये सङ्क्र-

[illegible]

एवाध्युपभोग इति परिभाषा तत्र द्विगुणख्यातिक्रमेऽपि यावन्मूलदानं तावदुपभुङ्क्ते एवाधिम्, एतदेव स्फुटीकृतं वृहस्पतिना "धनी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम्। यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी। ऋणी च न लभेद्बन्धं परस्परमतं विना" अस्यार्थः। फलभोग्यः यस्यासौ फलभोग्यः बन्ध आधिः स च द्विविधः सवृद्धिकमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र सवृद्धिमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयाद्धनी। यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टंतदा बन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकन्दत्त्वा प्राप्नुयाद्धनी। सम मूलं सममेव सामकम्। अस्यापवादमाह। यदि प्रकर्षितं तत्स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरप्यधिकफलं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेद्बन्धं, मूलमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्धेरप्यपर्याप्तंतदा सामकं दत्त्वापि बन्धम् न लभेतमर्णः वृद्धिशेषं दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह। परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम्। परस्परानुमतौ तत्कृष्टमपि बन्धकं यावन्मूलदानन्तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदानेनैवाधमर्णोलभत इति"।

आधिकरणिक पु० अधिकरणे विचारस्थाने नियुक्तः ठक्। विचारस्थाने नियुक्ते प्राड्विवेकादौ।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अतिशयितायाम्। "यदायमच्छेदायतामाधिक्यं भुवमात्मनः" मनु "युग्मायामपि रात्रौ चेत् शोणितं प्रचुरं तदा। कन्या च पुंवत् भवति शुक्राधिक्ये पुमान् भवेत्" ज्योतिस्तत्त्वम् "प्रातिपदिकमात्रे लिङ्गमात्राद्याधिक्ये" सि०कौ० "एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये व्यवस्थितम्" सुश्रु०।

आधिज्ञ त्रि० आधिं मम पीडां जानाति अनुभवति ज्ञा-क ६त०। व्याधानुभावके व्यथिते अमरपालः।

आधिदैविक त्रि० अधिदेव भवः देवान् वातादीन् अधिकृत्य प्रवृत्तः वा ठञ् अनुशतिका० द्विपदवृद्धिः। देवाधिकारेण प्रवृत्ते, शास्त्रे "अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च" मनु देवताऽधिकारेण प्रवृत्तवेदभागस्तु उपनिषद्प्रसिद्धः। वातादिनिमित्तके दुःखे च। दुःखं हि त्रिविधमाध्यात्मिकादिभेदात् तेषां स्वरूपकारणविभागादि सुश्रुते दर्शितं यथा "तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथाऽऽदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ता सङ्घातबलप्रवृत्ता कालबलप्रवृत्ता दैवबलप्रवृत्ता स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वया कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातुरपचारात्पङ्ग्वात्यन्धवधिरमूकमिन्मिनवामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसकृता दौहृदापचारकृताश्च॥ दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधाः शारीरा मानसाश्च त एत आध्यात्मिकाः॥ सङ्घातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एत आधिभौतिकाः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्तास्तेऽपि द्विविधा व्यापन्नर्तुकृता अव्यापन्नर्तुकृताश्च॥ दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ता क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृताश्चाकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता एत आधिदैविकाः"। एतदभिप्रायेणैव "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति सा०सू० "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सा०का० दुःखत्रयञ्च विवृतञ्च सां०त० कौ०। "दुःखानां त्रय दुःखत्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणाम् वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम्"। "तापत्रयोन्मूलनम्" भाग० १स्क० उक्तम्। दुःखञ्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणादि धर्म इति साङ्ख्यादयः। अन्तःकरणादेः त्रिगुणात्मकप्रकृतिकार्यत्वात् प्रीत्यप्रीतिविषादात्मनां त्रिगुणधर्माणां स्वस्वकार्ये सङ्क्र-

[illegible] इत्यादिमन्त्रलिङ्गात् [illegible]।

आधिपत्य न० [illegible] ।तथाहि "[illegible] राज्य [illegible] आधिपत्यम्। [illegible]"। "राज्याधिपत्यं मे देहि" [illegible]। "[illegible] राज्याय" [illegible] "[illegible] वैश्याधिपतेरिति [illegible] [illegible] राजराजस्येव च" [illegible] २०१ [illegible]। [illegible] "[illegible] [illegible] राज्य" [illegible]।

आधिभव्य [illegible]

[illegible] "सर्व राज्यम् [illegible]" युधिष्ठिरस्य [illegible] [illegible] [illegible]

[illegible]

[illegible] राज्यम् [illegible]। [illegible] राजा [illegible]

आधिभोग [illegible]

आधिभौतिक त्रि० भूतानि [illegible]। "[illegible]"। [illegible]

आधिराज्य [illegible]

आधिदैविक [illegible]

द० प० ३०८ अध्या० । तस्याधिरथपुत्रत्वप्राप्तिकथा च हि कन्यायास्तस्याः सूर्य्येण कुन्त्याम् उत्पादित पश्चाच्च तया स्वकुलभयात् जले त्यक्त अधिरथेन स्वीकृतो वर्द्धितश्च यथोक्तं “निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज जले कुन्ती तं कुमारं यशस्विनम् । तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः । राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा । चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ । दम्पती वसुषेणेति” भा०आ०६७अ० ।

आधिराज्य न० अधिराजस्य भावः कर्म्म वा ष्यञ् । आधिपत्ये “सभौ भूय कुमारत्वादाधिराज्यमवाप्य स” रघुः ।

आधिवेदनिक त्रि० अधिवेदनाय विवाहोपरिविवाहाय हितं ठक् तत्र काले दत्तं ठञ् वा । अधिवेदनार्थं तत्र काले च स्त्रियै पत्या दीयमाने स्त्रीधनभेदे । “पितृमातृपतिभ्रातृ दत्तमध्यग्न्युपागतम् । आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम्”या०स्मृ० “यच्च द्वितीयविवाहार्थिना पूर्वस्त्रियै पारितोषिकं धनं दत्तं तदाधिवेदनिकमधिकस्त्रीलाभार्थत्वात्तस्येति”दायभा०। मिताक्षरायां तु “आधिवेदनिकाद्यञ्चेति” पठितम् आधिवेदनिकम् अधिवेदननिमित्तमिति व्याख्यातञ्च आद्यपदेन क्रयरिक्थाद्याप्तस्य ग्रहणमित्युक्तम्। तत्र अधिवेदननिमित्तदाने विशेष या० स्मृत्युक्तं “अधिविन्नस्त्रियै देयमाधिवेदनिकं समम् न दत्तं स्त्रीधनं यस्या दत्ते त्वर्द्धं प्रकल्पयेत्” “एतदपि सामर्थ्ये असामर्थ्ये तु यत् किञ्चित् भरणपर्य्याप्तं दत्त्वा परितोषयेदिति भेदः । “एकामुद्वाह्य कामार्थमन्यां वोढुं य इच्छति । समर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत्” स्मृतौ समर्थपदस्वारस्यात्तथात्वम् । एवमेव मदनपारिजातविधानपारिजाताद्य ।

आधिस्तेन पु० आधेर्गोप्याधेर्भोगात् स्तेन इव । गोप्याधेर्बलात्कारेण भोक्तरि । “न भोक्तव्यो बलादाधिर्भुञ्जानोवृद्धिमुत्सृजेत् । मूल्येन तोषयेदेनमाधिस्तेनोऽन्यथा भवेत्”मनुना तद्भोगे स्तेनत्वस्योक्तेस्तथात्वम् ।

आधीकरण न० अनाधिराधिक्रियते आधि+च्वि+कृ-ल्युट् । बन्धकीकरणे आधिशब्दे मिताक्षरावाक्ये उदा०” क्त आधीकृत । दत्तबन्धके द्रव्यादौ त्रि० ।

आधुत त्रि०आ+धु-क्त। चालिते। [अप्राचीने च स्त्रियां ङीप्

आधुनिक त्रि०अधुना भव ठञ् । १साम्प्रतभवे २अर्वाचीने

आधृष्टि त्रि० आ+धृष-भावे क्तिन् । १परिभवे २बलात् निग्रहे च ।

आधेय त्रि० आ+धा-कर्मणि यत् । १उत्पाद्ये । “आधेयस्य क्रियाजस्य सोऽसत्त्वप्रकृतिर्गुणः” वा०का०। यस्य सतो गुणान्तरस्योत्पाद्यम् २ताद्दृशे उत्पाद्यगुणान्तरे विद्यमाने एव यत्र घटादिपदार्थे पाकादिना रक्ततागुणान्तरमाधीयते ताद्दृशे घटादौ । आधानविधिना ३स्थापनीये वह्नौ पु०। ४अधिकरणेऽभिनिवेशनीये “अधिकं द्युष्वाधारादाधेयाधिक्यवर्णनम्” चन्द्रा०। ५स्थापनीये द्रव्ये च । भावे यत् । ६आधाने न०। “अग्न्याधेयम्” आश्व० श्रौ०सू० । “अन्यतराभावे कार्या प्रागग्न्याधेयात्” बौधा०सू० ।

आधोरण पु० आ+धोर-गतिचातुर्ये ल्यु । हस्तिगतिचातुर्यैत्ने हस्तिपके । स्वल्पबलेनापि महाबलस्य हस्तिनः सङ्केतादिनैव चालनाचस्य गतिचातुर्य्यवत्त्वात्तथात्वम् ।

आध्मात त्रि० आ+ध्मा-क्त। १शब्दिते, २दग्धे, ३वातदोषजातोदरस्फीततासम्पादकरोगयुक्ते “साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्” सुश्रु० । भावे क्त ४आध्माने न० ।

आध्मान पु० आ+ध्मा-आधारे ल्युट् । “आध्मानमिति जानीयाद्घोरं वातनिरोधजम्”इत्युक्ते १वातव्याधौ । “मूत्रस्य च मूत्र सङ्गं अर्शांसि वस्तितोदमाध्मानश्च” सुश्रु० भावे ल्युट् । २उदरस्फीततायाम् । ३अग्निसंयोगजे शब्दभेदे न० । करणे ल्युट् । ४मल्लिकानामगन्धद्रव्ये स्त्री०ङीप् ।

आध्मापन न० आ+ध्मा-णिच्-पुक्-भावे ल्युट् । १शब्दनिष्पादने २आध्माननिष्पादने सुश्रुतोक्ते ३शल्यापसारणीयव्यापारभेदे च । “अणून्यवगाह्यानि परिषेचनाध्मापनैर्मार्जनश्चपाणिभिः प्रमार्ज्जयेत्” सुश्रु० ।

आध्यक्ष्य न० अध्यक्षस्य भाव ष्यञ् । १अधिष्ठातृत्वे २अधिकर्तृव्यापारे ३प्रत्यक्षत्वे च । [स्मृतौ

आध्या स्त्री आ+ध्यै-भावे अङ् । १चिन्तने २उत्कण्ठायाम्

आध्यात्मिक त्रि० आत्मानं मम शरीरादिकमधिकृत्य भवं ठञ् । शोकमोहज्वरादिरूपे दुःखे । आधिदैविकशब्दे-ऽस्य विवृतिः । [र्थ्यकरणे च ।

आध्यान न० आ+ध्यै+-ल्युट् । १चिन्तायाम्, २उत्कण्ठापू-

आध्यापक पु०अध्यापक एव स्वार्थेऽण् । अध्यापके शब्दरत्ना०

आध्यायिक पु० अधीयतेऽध्यायोऽध्येयोवेदस्तमधीते ठञ् । अधीतवेदे “युवा स्यात् साधुयुवाध्यायिकः” तैत्ति०उ० । “आध्यायिकोऽधीतवेद” भा० ।

आध्यासिक त्रि० अध्यासेन कल्पितं ठक् । वेदान्तिमते अध्यासेन कल्पिते अतद्वति तत्त्वारोपेण कल्पिते पदार्थे यथा शुक्तिकादौ रजतादि कल्पितम् एव ब्रह्मणि जगदादि

धारोऽभिवर्धिति महात्मानिकर्मविधि मेहाभिविहात्मः ।

धाम् इ धाम्+स्वच्+अ । धामदे । "धामस्व पिप्र मवति चाई च १।११।१०। धाम्नेन विस्वेन वनार च ७।१८।१७ ।

धाम्निक त्रि धामन् उप्रमः ठञ । मदिनुसमे "धामार्द धरि विधानि धमदावानिवह च धा धा ।

धाध्वरायन इ स्त्री धध्वरोधवानिवच धौसायनम् धद्दा धम् । धवनिरौसायने ।

धाध्वरिक इ धमदस्य धावाणो यान्नः ठञ । धाम रधावाथे ।धय्ने । धधर्द धय मैति धमविनाहस्य धवर्तीति धा उञ् । रधर्मनैर्दि रधदविनाहधयथा भेवरि च त्रि ।

धाध्वर्यव त्रि धध्वर्यौमुर्दवदि रदम् धम् । धम च धर्मविधि धर्मापो । धदि धानेव च राजा विमुनिहरोविनयम्" धम १ ११२१ । धर्मदेव वीम धडधव मवरैदेयावन च धाचैरेभोविषम् धम धा ।

धाम इ धाविर्भाव धा+धम धरचे विम् धां धावयपुरा धया दाराका धनूददादी धच् । धवरूर्मिणचरावन धमादिवन प्राधनमोर्धविभवा धविनिधारचैवभवादी

धामक इ धामवति धौसारानाम् धूरोति वेद--विम् धड्ड । ।धरवे रधदहें धया धहाश मेवच रचवातमथोहवाः धवदिरावस्वथम" मौवा रधमप्पूभिहे च । ।धनूदादी त्रि । धर्वाहि धहरवा विम् । धाननावनि । धनुवविनाहवेयारी त्रि ।

धामवनभूमि इ० धानव मौध्रावधौनुवदिवैसनवा- निवेनो धम । ।धर्वनिवदि धहरै । धधुनमोधवे वि धचा नावा धनूधवे धार्मविधि धम धवानम् । रधमूद्दे धावां स्त्री धा वौम् ।

धामबाधाकी स्त्री धामकरावा धाकी मा इ । धामकप्रमारूरावधी रैसबेरै धयों धनः धहरयैधादी धूमा धम् । धामकदावचा धनूनविधारैयादी त्रि ।

धामभूम च धामकर रदम् धम् । ।धमरवर्मविधि धौमच धयोरी । धामकधोमौवन।धवर धाचोपावर धौमि "धचरूवामभूरे रधो धार्मं धहरावमे धया" धा धम । धनकरा धमम् धम् । रधनापर्वनारे धौवेरी धम धौवे धर्विविधविधारचैविवाश्च धया धौधहा धर्वदिषा । "धनाददाराजव विनाराय धवैराण ।) धौरवेवादरव धाम धविधाव। धयावचम् । धरच च धविराम्य धमाद

तिरै विरिम्" धौममाधिधि विधायम्"धरि ८१९ ।

धामबुध्न त्रि धनबुध्न धमम् धेधावां धवधा धम् । धनबुद्धरौ धौधवारो ।

धामबुध्न इ धनबुध्नौधोसायनम् धयो धम् । धनबुधायनच धौधैसायने । धतः इनः धौसायने धया धम । धामवधायनः धहराहें इ धौ । धहरना । धधौ विम् । धामवधायनि धनूचविवार हैयादी त्रि ।

धामत त्रि धा+धम् स । ।धमावाचे, ।धमोधने ।विभेव धतौ च "ध धामवदमवर्द धविधामयोऽर्चिष" धा ।धवधवे ।"धा मधुरैधानचन्धनाधम्"रघुः ।

धामति स्त्री धामवति धच्चोधधनम्वा धा+धम--धरचे विम् । धाधवमधवे ।धनोरे "धम विराजविधैर्मविधावराम् च धविधवन्धारचनमाधनैरिदि धामविधा च धविधयार्थम' प्रमवेयुका धनम्धरस् धामविधारैच विराजवचाहेवा धविधवन्धारचनादिवि" "धामवैरविधयोधावरविधाधादिवि च धान धा । धाने विम् । रधवीमाचे रधमोमावे ।धमधावाय धाममादिद धवी विधावविम्" विरा ।

धामनू च धा+मनू+अ । धर्मेधा धहवी ।धदधमधावे धाधवैरे । ।धविदे, ।धारे, ।धवे धैधपुधादिवे च त्रि । "धूमारे हे धमोधूर्व धविवेदून धम विधायवर्दिवा धव

धामन च धविमवेव धा+धम--धरच धुर । धदे धमेव वि धवमानादिना धावारे विविधायवर धवानम् "धारवे धवनिवारै। धविनुवविमावनी" "धदाव धरावहनि विवीधर " धमवा धाव विमा: धवारवत्" रवि च रघुः ।

धामनाय च धमनरोर धहने धार्ने धम । ।धवनीति धवनाराव धावा धम् । रधवनरवानी । धामवनीत् धन- धौधाश्च धवा धाद्योमुवि धमान्"धय "धवन धावा- धमावमर्नार्हूपवैश्व" धमवा ४ १ ११ ।

धामनाग च धवनवर धार्ने धा । ।धवनी रधवाचे धन- धम धान धम् । रधौवानूवमो ।धाधवादिमा वधि- मैविरराजन धहावमान धवधौ धड् । धौधामद विच धादि: धमवीमयशेव धा धवि ।"धामनाम धूमवकायौ धाराची विधीवरी धा इ इ रधामवनीय- हाराधू "धम्र मिर्मं धवविवमचैवाविवदही । धनद्वम्नः

कल्याणि। सोऽमृतानन्त्यमश्नुते" भा०व०प० २१ख०।
आनन्द पु० आ+नन्द–घञ्। १हर्षे सुखे, २दुःखाभावे, ३ब्रह्मणि च। अर्श आदित्वादच्। ४आनन्दवति त्रि० "सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतिः। नैयायिका आनन्दशब्दः दुःखाभावे लाक्षणिकइत्याहुः ब्रह्मणि आनन्दाभावेऽपि दुःखाभावरूपानन्दस्य तत्र सत्त्वात् आनन्दवत्त्वमिति ते मन्यन्ते वेदान्तिनस्तु छान्दसं मतुपकमिति आनन्दस्वरूपत्वमेव ब्रह्मणः दुःखाभावरूपस्यानन्दस्याधिकरणस्वरूपत्वादित्याहुः एतदभिप्रायेणैव विवरणे "आनन्दोविषयानुभवो नित्यत्वञ्चेति सन्तिधर्मा अपृथकत्वेऽपि पृथगिवावभासन्ते इत्युक्तम्" यथा च ब्रह्मण आनन्दप्रचुरत्वादानन्दमयत्वं तथा "आनन्दमयोऽभ्यासात्" शा०सू०भा० व्यवस्थापितम् तैत्ति०उप० आनन्दमयं प्रकृत्य "तस्य प्रियमेव शिरो मोदोदक्षिणः पक्षः प्रमोदउत्तरः पक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा"। "तस्यास्यानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात्। मोद इति प्रियलाभनिमित्तो हर्षः। स एव च प्रकृष्टो हर्षः प्रमोदः। आनन्द इति सुखसामान्यम्, आत्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म। तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसा प्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते तद्विषयसुखमिति प्रसिद्धं लोके। तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात् सुखस्य क्षणिकत्वम्। तद्यदन्तःकरणं तपसा तमोघ्नेन, विद्यया, ब्रह्मचर्येण, श्रद्धया च निर्मलत्वमापद्यते यावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणविशेष आनन्द उत्कृष्यते विपुलीभवति। वक्ष्यति च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति एष ह्येवानन्दयाति" "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति"श्रुत्यन्तरात् एवञ्च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते। एवञ्चोत्कृष्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्दलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः। यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठा" भा० ब्रह्मण आनन्दरूपत्वमपि तत्रैव दर्शितं यथा "यद्वै तत् सुकृतं रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते" तै० उ०। "कुतो ब्रह्मसत्वमसिद्धिमिच्छाम इत्यत आह। यद्वै तत् सुकृतं रसो वै सः। रसो नाम तृप्तिहेतुरानन्दकरो मधुराम्लादि प्रसिद्धो लोके। रसमेवायं लब्ध्वा प्राप्यानन्दी सुखी भवति नासत आनन्दहेतुत्वं दृष्टं लोके। बाह्यानन्दसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसो नूनम्। ब्रह्मैव रसस्तेषाम् तस्मादस्ति तेषामानन्दकारणं रसवद्ब्रह्म। इतश्चास्ति कुतः। प्राणनादिक्रियादर्शनात्। अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति। एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्यकारणैर्निर्वर्त्यमाना दृश्यन्ते। तच्चैकार्थवृत्तित्वेन संहननम् संहन्यमानं च नान्तरेण चेतनं संहतं सम्भवति अन्यत्रादर्शनात्। तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यान्न भवेत्को ह्येव लोकेऽन्यादपानचेष्टां कुर्यादित्यर्थः। कः प्राण्यात् प्राणनं कुर्यात्तस्मादस्ति तद्ब्रह्म। यदर्थाः कार्यकारणप्राणनादिचेष्टाः? तत्कृत एवानन्दो लोकस्य। कुतः। एष ह्येव पर आत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम्। स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः" भा०। सर्वानन्दापेक्षया ब्रह्मरूपानन्दस्योत्कर्षस्तत्रैव दर्शितो यथा "सैषानन्दस्य मीमांसा भवति। युवा स्यात् साधुयुवाध्यायिकः। आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः स एकः पितॄणां चिरलोकलोकानामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्मदेवानामानन्दः ये कर्मणा देवानपि यन्ति, श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानामानन्दाः स एको देवानामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं

[illegible] स एव [illegible] बोधिसत्त्व यानारूढस्य । ते वै सर्वे [illegible] स एको [illegible] बोधिसत्त्व यानारूढस्य । ते वै सर्वे [illegible] । स एव [illegible] बोधिसत्त्व यानारूढस्य । ते वै सर्वे [illegible] स एको महत् यानम्‌ बोधिसत्त्व यानारूढस्य । [illegible] स एव । [illegible] [illegible] ” इति च ‘[illegible] महत् यानमुच्यते [illegible] [illegible] । [illegible] [illegible] । [illegible] बोधिसत्त्व [illegible] । [illegible] [illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

तदेवानुप्रविष्टं स य इति निर्दिश्यते । स एकोऽसावयं पुरुषे यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति स यश्चासावादित्ये इति स एकः । तमीमांसया च सिद्धमुपपत्तीकृतं भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । नन्वानन्दस्य मीमांसा प्रक्रान्ता तस्या अपि फलमुपसंहर्त्तव्यम्, अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसम्बन्धजनित इति । ननु तदनुरूप एवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्दनेन । नन्वेवमप्यादित्यविशेषणमनर्थकम् । नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि यो मूर्त्तामूर्त्तलक्षणस्योत्कर्षः सवितर्यभ्यन्तरगतः स चेत् पुरुषगतविशेषोपमर्द्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्यभयं प्रतिष्ठां विन्दत इत्युपपन्नम्"। "स य कश्चिदेवं यथोक्तं ब्रह्मोत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमस्मीति । एवमित्यस्य प्रकृतपरामर्शार्थत्वात् । स किम्? अस्माल्लोकात् प्रेत्य दृष्टादृष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लोकात् प्रेत्य प्रत्यावृत्त्य निरपेक्षो भूत्वा एतं यथा व्याख्यातमन्नमयमात्मानमुपसङ्क्रामति विषयजातमन्नमयात् पिण्डात्मनो व्यतिरिक्तं न पश्यन्ति सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः । ततोऽभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्मस्थमविभक्तम् । अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसङ्क्रामति । अथाऽदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते तत्रैव भान्यत्र च" शाङ्करभाष्यम्

अत्र प्रसङ्गात् सुखदुःखादीनां स्वरूपकारणादिकं तावन्निरूप्यते प्रकृते सुखदुःखमोहात्मकसत्त्वरजस्तमोगुणरूपत्वात् सुखादीनां सत्त्वादिकार्य्यत्वम् । यथोक्तं सां॰का॰ "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" अस्याः सां॰कौ॰ व्याख्या ।

"प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखम् अप्रीत्यात्मको रजोगुणः, विषादो मोहः विषादात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीतिर्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मपदं पठन्ति नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः । एवमन्यदपि व्याख्येयम् । भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः । स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव । रजः प्रवर्त्तकत्वात् सर्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थम् । प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते । अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते । तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति" ।

